ISSN : 975-2676
वर्षम्-१०
अङ्काः-३६-३७

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४२ वैक्रमाब्दः २०७४ चैत्र शुक्ल ४ - अश्विन शुक्ल १० शकः १९३९ अप्रैल २०१७ - सितम्बर २०१७

## कुलपतिवाक्

**आप इद्वा उ भेषजीरापो अमीवचातनीः।** -ऋ १०.१३७.६

जलं जीवलोकस्य औषधम्, जलमेव सर्वरोगनाशकं जीवनं भासते। इति ऋग्वेदवाणी सततं स्मारयति अस्मान्।

क्षणमेकं चिन्तयन्तु, जलं विना प्राणिनां जीवनं कथं स्यात्? पार्थिवं शरीरं तोयं विना कियत्कालं तिष्ठेत्?भूत-वर्तमान-भविष्यत्सु, सृष्टि-स्थिति-लयेषु सर्वत्र सर्वदा सर्वथा जलमेव जीवनाधारो वर्तते। "आपो हिष्ठामयोभुवः" इति श्रुत्यनुसारं नान्यथा प्रपञ्चः प्रसरति। भूमिमधितिष्ठन्तो वयं जलसङ्कटे पार्थिवं शरणं गच्छामः। देवमातृका नदीमातृका च भारतभूमिः सुजला सुफला सस्यश्यामला इति भूमातरं स्तुमः।

**आपो देवीरूपं ह्वये यत्र गावः पिबन्ति नः।**
**सिन्धुभ्यः कत्वं हविः।** -ऋ. १.१३

मानवोऽहं पवित्रां जलदेवतां समाह्वयामि, प्रार्थये च। यत्र गावः जलं पिबन्ति तत्र नदीषु जलं वर्षय। तेन प्रसन्नो वरुणः वर्षाभिः भूमिं तर्पयति। अतः मानवानामस्माकं सदाचारैः धरित्री देवमातृका सती सुशोभते। पुनश्च काङ्क्षामहे याचामहे च जलदेवते नदीः प्रपूरय इति। तेन च नदीमातृका भूमाता सदा सस्यश्यामला राराज्येत।

प्रतिदिनम् आपगाः रक्षेयुः। नित्यपूजायां सरितः अर्चयेम। यथा-

''गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् (देशेऽस्मिन्) सन्निधिं कुरु।'' इति। पुत्रवत् वनौषधीनां पोषणेन भूप्रदेशाः देवमातृकाः स्युः। प्रवहन्त्यः जीवनद्यः भूमिं सस्यश्यामलां कुर्युः। तस्मादेव 'अदीनां स्याम शरदः शतम्' नान्यथा। 'जलं रक्षति रक्षितम्' इत्यस्माकं बीजमन्त्रः प्रसरेत्। 'आपः पृणीत भेषजं वरूथं तन्वे मम' (ऋ १.२१) इति ऋग्वेदवाणी प्राणान् अनुरणयेत्।

**'तीर्थस्तरन्ति प्रवतो महीः।'** -अथर्व. १२.४.७

सरितः सृजन्ति जीविकां, पुनन्ति जीवनं, शोधयन्ति मलं, तदिदम् अधिगच्छामः। आर्षपरम्पराम् अनुसरन्तः वयं संस्कृतात्मानः संस्कृतसाहित्यनिष्ठं पञ्चभूतान्तर्गतम् अप्तत्त्वं सेवामहे। अनूचानं पन्थानम् अनुसरन्तः जीवातुभूतं जलं जीवनं मन्वानाः संस्कृतगङ्गायां निमज्जामः। सरित्तटविकसितां भारतीयसंस्कृतिं रक्षितुं प्रयतेम इति विभिन्नपरिसरीयाः सम्भूय प्रतिजानीमहे।

**इदमापः प्र वहत यत्किं च दुरितं मयि।**
**यद्वाहम् अभिदुद्रोह यद्वा शेपे उत अनृतम्।।** -ऋ. म १ सू २३

*-परमेश्वरनारायणशास्त्री*



संस्कृतसप्ताहोत्सवस्य उद्घाटनं विदधानः अतिथिगणः




माननीयमानवसंसाधनविकासमन्त्रालयराज्यमन्त्रिणां डॉ. महेन्द्रनाथपाण्डेयवर्याणां सम्माननम्




शुभाशिषः वितरन्तः डॉ. महेन्द्रनाथपाण्डेयवर्याः

**मुख्यपरामर्शदाता**
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**
प्रो. सुब्रह्मण्यशर्मा
प्रो. मनोजकुमारमिश्रः
प्रो. सुकान्तकुमारसेनापतिः

**सम्पादकः**
डा. मधुकेश्वरभट्टः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता द्रष्टुं शक्यते-
**www.sanskrit.nic.in**

# संस्कृतवार्ता
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
ISSN : 975-2676

प्रकाशकः
**कुलसचिवः**
**राष्ट्रियसंस्कृतसंस्थानम्**
(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिस्पन्दः



राष्ट्रियसंस्कृतसंस्थानेन प्रकाश्यमाना संस्कृतवार्तापत्रिका परिसरेषु जायमानानां कार्यक्रमाणां दिग्दर्शिका विद्यते।

–रमेशः, बिहारः

## समाचरितः विश्वयोगदिवसः

योगस्य महत्त्वम् आवश्यकतां च विज्ञाय संपूर्णे विश्वे जूनमासस्य २१दिनाङ्के विश्वयोगदिवसः समाचर्यते। राष्ट्रियसंस्कृतसंस्थानेनापि ऐषमः तृतीयः अन्ताराष्ट्रिययोगदिवसः समाचरितः। संस्थानस्य मुख्यालयस्य सदस्याः योगासनस्य अभ्यासः कृतः।




योगाभ्यासे निरताः कुलसचिवाः कर्मचारिणश्च

## आचरितः एकसप्ततितमः स्वतन्त्रतादिवसः

१५-०८-२०१७ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये एकसप्ततितमः स्वतन्त्रतादिवसः ससन्तोषं समाचरितः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः ध्वजोत्तोलनं विधाय देशस्य प्रगतौ अस्माकं कर्तव्यपालनमेव महत् योगदानं विद्यते इति सन्देशं प्रादात्। सन्दर्भेस्मिन् संस्थानस्य कुलसचिवः, आचार्याः कर्मचारिणश्च उपस्थिताः आसन्।




स्वतन्त्रतादिवससमाचरणस्य दृश्यम्

**गच्छन् पिपिलिको याति योजनानां शतान्यपि।**
**अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।**

–सुभाषितरत्नभाण्डागारः

## समाचरितः संस्कृतसप्ताहमहोत्सवः



दीपं प्रज्वलयन्तः डॉ. जीतारामभट्टवर्याः कुलपतयश्च

राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ऐषमः संस्कृतसप्ताहमहोत्सवः ०४-०८-२०१७ तः ११-०८-२-१७ दिनाङ्कपर्यन्तं समायोजितः। संस्कृत-सप्ताहोत्सवमुपलक्ष्य नैके कार्यक्रमाः समायोजिताः। इमे कार्यक्रमाः ज्ञानभाण्डागारस्य संस्कृतभाषायाः प्रसारे प्रचारे च अवश्यमेव उपयोगिनो भविष्यन्ति।

०४-०८-२०१७ दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य उद्घाटनकार्यक्रमः राष्ट्रियसंस्कृतसंस्थानस्य सभागृहे संपन्नः। कार्यक्रमे मुख्यातिथिपदं दिल्ली-संस्कृत-अकादम्याः अध्यक्षः डा. जीतराम भट्टवर्यः, आध्यक्षं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः च अलमकार्षीत्। संस्कृतभाषा सदाचारं बोधयति सन्मार्गं सन्दिशति सद्गुणं जागरयति इति मुख्यातिथिः डा जीतराम भट्टवर्यः उदबोधयत्। सर्वभाषाप्रसूः संस्कृतभाषा ज्ञाननिधिः वर्तते। अस्यां भाषायां विद्यामानाः विषयाः ऋषीणां तपस्यजाः अनुभवजाः च सन्ति। सर्वदा विश्वशान्तिं सर्वजीवेषु समभावनां च बोधयति इति कुलपतिमहोदयः आध्यक्षभाषणे अवदत्। कार्यक्रमेस्मिन् संस्थानस्य कुलसचिवमहोदयः आचार्यः एस्. सुब्रह्मण्य शर्ममहाभागः, परीक्षानियन्त्रकः संस्कृतसप्ताहकार्यक्रमस्य संयोजकः आचार्यः सुकान्तकुमारसेनापतिमहोदयः, विभागप्रमुखाः कर्मचारिणश्च समुपस्थिता आसन्।



स्पर्धायां तल्लीनाः छात्राः

०५-०८-२०१७ दिनाङ्के विद्यालयस्तरीयच्छात्राणां विश्वविद्यालयीयच्छात्राणां च कृते चतुर्षु स्तरेषु संस्कृते विज्ञानम्, आतङ्कवादस्य निर्मूलने संस्कृतस्य योगदानम्, स्वच्छभारतम् इति विषयमाश्रित्य निबन्धलेखनस्पर्धा, कुमारसंभवकाव्यस्य पञ्चमसर्गमादाय काव्यकण्ठपाठस्पर्धा, भजगोविन्दस्तोत्रमाश्रित्य स्तोत्रकण्ठपाठस्पर्धा च समायोजिता। स्पर्धायां दिल्लीस्थविद्यालयस्य विश्वविद्यालयस्य च छात्राः सोत्साहं भागम् अग्रहिषुः।

०८-०८-२०१७ दिनाङ्के समायोजितायां भाषणस्पर्धायां छात्राः योगः कर्मसु कौशलम्, अहं प्रधानमन्त्री भवेयम्, आचारः परमो धर्मः इति विषयमादाय विभिन्नस्तरेषु भाषणं व्यधासिषुः।

संस्कृतसप्ताहमुपलक्ष्य ०९-०८-२०१७ दिनाङ्के विशिष्टसमारोहः नवदेहलीस्थ-मौँवलङ्करप्रेक्षागृहे मानवसंसाधनविकासमन्त्रालयः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, दिल्लीविश्वविद्यालयस्य संस्कृतविभागः, जवाहरलालनेहरू-विश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रम्, गोस्वामीगिरिधारीलालप्राच्यविद्याप्रतिष्ठानम्, दिल्लीसंस्कृतअकादमी, राष्ट्रियशैक्षिक-अनुसन्धान-प्रशिक्षणपरिषदः संस्कृतविभागः, देववाणीपरिषद्, अखिलभारतीयसंस्कृतप्रकाशकसंघः, संस्कृतभारती, अखिलभारतीय-पत्रकारसंघः, संस्कृतसंवर्धनप्रतिष्ठानम्, अखिलभारतीयसंस्कृतसाहित्यसम्मेलनम्, जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागः, श्यामाप्रसादमुखर्जी-महाविद्यालयः, दिल्लीसंस्कृतशिक्षकसंघः इति सप्तदशानां संस्कृतं सेवमानानां संस्थानां संयुक्ततत्त्वावधाने समपादि। भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य माननीयः राज्यमन्त्री डा. महेन्द्रनाथ पाण्डेयमहाभागः कार्यक्रमं समुदजीघटत्। अस्मिन् अवसरे संस्कृतभाषाम् आराधयन्तः अत्र विद्यमानवैज्ञानिकांशाः अपि समाजं प्रति नेतव्याः इति अवदत्। कार्यक्रमे अस्मिन् संस्कृतभाषाविकासाय परिश्रमं विदधानाः श्री भाग्येश वासुदेव झा (आई.ए.एस् सेवानिवृत्तः) डा. आ.वि.एस्.एस्. अवधानुलुमहोदयः, डा. मुरलीकृष्णनन्दीवर्यश्च विशिष्टसंस्कृतसेवावृतिसम्मानेन सभाजिताः। कार्यक्रमेस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-



विशिष्टकार्यक्रमस्य एकं दृश्यम्

मुख्यालयवार्ता

विद्यापीठस्य कुलपतिः आचार्यः रमेशकुमारपाण्डेयश्च अधिमञ्चं व्यभूषयत्। अवसरेस्मिन् वीणापाणिसंस्कृतसमितिसदस्यैः षोडशसंस्कारः इति रूपकम् अभ्यनीयत।

१०-०८-२०१७ दिनाङ्के विद्यालयच्छात्राणं विश्वविद्यालयच्छात्राणं च कृते आशुभाषणस्पर्धा वदतुसंस्कृतस्पर्धा संस्कृतगीतस्पर्धा च समायोजिता आसु स्पर्धासु छात्राः सोत्साहं भागम् ऊढवन्तः।



समापनकार्यक्रमे मञ्चासीनाः अतिथिप्रमुखाः

११-०८-२०१७ दिनाङ्के संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः राष्ट्रिय-संस्कृतसंस्थानस्य प्राङ्गणे संपन्नः। कार्यक्रमे मुख्यातिथिपदं राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः निदेशकः डा. हृषिकेश सेनापतिवर्यः, विशिष्टातिथिपदं केन्द्रीयविद्यालय-संगठनस्य अपरायुक्तः श्री उदयनारायण खावडेवर्यः, सारस्वतातिथिपदं जामिया-मिल्लिया-इस्लामिया विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः गिरीशचन्द्र पन्तवर्यः, आध्यक्षं संस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः च अलमकार्षीत्। स्वागतं संस्कृतसप्ताहप्रतिवेदनं च संस्थानस्य परीक्षानियन्त्रकः संस्कृतसप्ताहस्य संयोजकः आचार्यः सुकान्तकुमारसेनापतिमहोदयः व्यदधात्। संस्कृतभाषा मधुरा परिनिष्ठिता वैज्ञानिकभाषा च। अत एव नासा संशोधकैरपि अस्याः भाषायाः उपयोगं कुर्वन्तः सन्तीति राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः निदेशकः डा. हृषिकेश सेनापतिवर्यः अवदत्। संस्कृतभाषा राष्ट्रभावनां संप्रेरयति। अस्माकं प्राचीनग्रन्थेषु उक्ताः सर्वे विषयाः एकतां शान्तिं च सन्दिशन्तीति जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः गिरीशचन्द्र पन्तवर्यः अबोधयत्। अस्य देशस्य प्रत्येकं वस्तुनि संस्कृतस्य गन्धः विद्यते। भारतस्य भाविप्रजाः छात्राः सन्ति। छात्राः संस्कृतभाषायाः महत्त्वं जानन्ति तदा संस्कृतपुष्पसुगन्धः सर्वत्र प्रसरतीति संस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः स्वाशयं प्राकटयत्। संस्कृत-सप्ताहमहोत्सवे आयोजितासु स्पर्धासु विजेतृभ्य छात्रेभ्यः पुरस्कारं व्यतरन्।


पुरस्कारं वितरति माननीयः कुलपतिमहोदयः

## विशिष्टव्याख्यानं मुक्तस्वाध्यायपीठस्य सत्रारम्भश्च

०५-०९-२०१७ दिनाङ्के शिक्षकदिवसमुपलक्ष्य मुक्तस्वाध्यायपीठेन शिक्षाविदां डा. चान्दकिरणसलुजामहोदयानां विशिष्टव्याख्यानं समायोजि। शिक्षणे अध्यापकस्य मुक्तस्वाध्यायस्य च भूमिकां प्रास्तावीत्। कार्यक्रमे अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः व्यभूषयत्। मुक्तस्वाध्यापीठस्य निदेशकः आचार्यः रमाकान्तपाण्डेयः सर्वेभ्यः स्वागतं व्याहरन् मुक्तस्वाध्यायकेन्द्रे नूतनतया प्रविष्टानां छात्राणां कृते मुक्तस्वाध्यायस्य महत्त्वं च प्राकटयत्। विडियो कान्फ्रेन्समाध्यमेन संस्थानस्य विविधपरिसरेषु नूतनतया प्रविष्टानां छात्राणां कृते शुभाशंसनं प्रायच्छत् संस्थानस्य कुलपतिवर्यः।


अभिनन्दनं कुर्वन्तः कुलपतयः मुक्तस्वाध्यायपीठस्य निदेशकाश्च


शिक्षकदिवसाचरणकार्यक्रमे मञ्चासीनाः अतिथयः

## हिन्दीपखवाडस्य (पाक्षिकस्य) अनुपालनम्



दीपं प्रज्वलयति अतिथिवर्यः

राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये भारतराष्ट्रस्य राजभाषास्थाने प्रतिष्ठितायाः हिन्दीभाषायाः प्रसाराय भारतसर्वकारस्य हिन्दीपक्षपरिपालनावसरे 'निबन्ध-आशुभाषण-सुलेख-श्रुतलेख-स्वरचितकविता-टंकण-नाटक-नोटिंग ड्राफ्टिंग' इत्याद्यः हिन्दीस्पर्धाः समायोजिताः। सप्ताहव्यापिनः कार्यक्रमस्यास्य उद्घाटनावसरे दिल्ली-राजभाषाविभागस्य डॉ. रामनिवासशुक्लमहोदयेन मुख्यातिथिरूपेण समागत्य हिन्दीभाषायाः सर्वकारीयस्तरे देशे चलमानानां कार्यक्रमाणां विषये आलोकपातं कृतम्। ततः प्रारभ्य अष्टाविंशतिदिनाङ्कं यावत् स्पर्धाः प्रचालिताः। यासु राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये कार्यरताः बहवः अधिकारिणः, कर्मचारिणश्च छात्राः स्पर्धासु भागग्रहणं कृतवन्तः। ऐषमः हिन्दीपक्षस्य विशेषस्पर्धारूपेण 'नुक्कडनाटकं' प्रयोगे आनीतं, यत् अतीव प्रेरकत्वं आसीत्। समापनसमारोहे मुख्यातिथिरूपेण समाहुतेन राजभाषाविभागस्य तान्त्रिकविशेषज्ञेन डॉ. केवलकृष्णेन अन्तर्जाले हिन्दीभाषायाः प्रचारप्रसाराय सर्वकारीयचेष्टाः तथा संगणकीय-चलदूरभाषगतानि सौविध्यान्यपि समेषां ज्ञानवर्धनाय प्रकटितानि। कार्यक्रमेऽस्मिन् माननीयेन कुलपतिमहोदयेन मुख्यातिथिना सह स्पर्धासु पुरस्कारभाजां कृते पुरस्काराणि प्रमाणपत्राणि च वितरितानि।




अतिथिं सम्मानयति कुलपतिमहोदयः



पुरस्कारं वितरन् कुलपतिवर्यः

## आन्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठद्वारा आयोजिताभिविन्यासकार्यक्रमः

१८.०९.२०१७ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये आन्तरिकगुणवत्ताप्रकोष्ठस्य उपवेशनं तथा एकदिवसीयाभिविन्यासकार्यक्रमश्च समायोजितः। अत्र मुख्यवक्तृरूपेण राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः प्रमुखः डॉ. गणेश हेगडेवर्यः समुपस्थाय एस्.एस्.आर्. इत्यस्य पूरण कथं विधेयम् इति उद्बोधितवान् उपवेशनेऽस्मिन् कुलपतयः, कुलसचिवः, विभिन्नपरिसराणाम् आन्तरिकमूल्याङ्कनप्रकोष्ठस्य सदस्याः समुपस्थिता आसन्।



संबोधयति डॉ. गणेश हेगडेवर्यः



सदस्यैः सह कुलपतिवर्यः कुलसचिवर्यश्च



## कुलपतिदैनन्दिनी

०६-०६-२०१७ दिनाङ्के National Institute of Cleaning Education and Research (NICER) नवदेहलीद्वारा आयोजितकार्यक्रमे उपस्थितिः।

०७-०६-२०१७ दिनाङ्के कर्नाटकराज्यस्य श्रवणबेलगोलप्रदेशे आयोजिते अखिलभारतीयविद्वत्सम्मेलने मुख्यातिथित्वेन उपस्थितिः।

२१-०६-२०१७ ICCR द्वारा फ्राँन्स-देशे आयोजिते अन्ताराष्ट्रियसंस्कृतसम्मेलने उपस्थितिः।

०८-०७-२०१७ दिनाङ्के Digital Invites for Higher Education इत्याख्ये सम्मेलने उपस्थितिः।

१२-०७-२०१७ माननीयप्रधानमन्त्रिणां श्रीनरेन्द्रमोदिवर्याणां जीवनाधारितपुस्तकस्य लोकार्पणकार्यक्रमे भागग्रहणम्।

२६-०७-२०१७ दिनाङ्के गुजरातविश्वविद्यालये आयोजितकार्यक्रमे मुख्यातिथित्वेन उपस्थितिः।

०३-०८-२०१७- दिनाङ्के दिल्लीसंस्कृतअकादमीद्वारा आयोजितसंस्कृतसप्ताहोत्सवस्य कार्यक्रमे सारस्वताथित्वेन उपस्थितिः।

०९-०८-२०१७ दिनाङ्के संस्कृतसप्ताहमुपलक्ष्य समयोजिते विशिष्टकार्यक्रमे समुपस्थितिः।

## परिसरीयविदुषां क्रियाकलापाः उपलब्धयश्च

**प्रो. महाबलेश्वर पि. भट्टः–** मे-मासे स्वर्णवल्लीमठे प्रचलितायां शास्त्रगोष्ठ्यां भागः स्वीकृतः। जून मासे २६ दिनाङ्के संस्थाने मुक्तस्वाध्यायपीठाभिलेखसमित्यां भागः स्वीकृतः। जूनमासे २७ दिनाङ्के संस्थाने विद्यापरिषदि भागः स्वीकृतः।

**सुब्राय वी. भट्टः–** १३.०५.२०१७ तः १७.०५.२०१७ पर्यन्तं स्वर्णवल्लीमठे प्रवृत्तायां शास्त्रगोष्ठ्यां भागः गृहीतः।

**डॉ. चन्द्रकान्तः–** एप्रिल्-प्रथमदिनाङ्कतः तृतीयदिनाङ्कं यावत् Translation of Education Research encyclopedia परियोजनायाः कार्यशालायाः संयोजकत्वेन भागः स्वीकृतः। मे ५ तः ११ पर्यन्तं मूल्याङ्कनकार्यार्थं संस्थानस्य भूपालपरिसरे भागः स्वीकृतः। जून मासे-७, ८, ९, दिनाङ्केषु श्रवणबेलगोले महामस्तकाभिषेकाङ्गत्वेन आयोजिते अखिलभारतीयविश्वसम्मेलने सम्पत्पुरुषरूपेण पत्रप्रस्तावः विहितः। जून्-मासे ७ दिनाङ्के श्रवणबेलगोले समायोजिते कविसम्मेलने काव्यवाचनं कृतम्।

**डॉ. आर्.बालाजी–** १५.०५.२०१७ दिनाङ्कतः २६.०५.२०१७ पर्यन्तं राजीवगान्धीपरिसरे प्रवृत्ते केन्द्रीयविद्यालयीयसेवाकालिकप्रशिक्षणवर्गे संयोजकरूपेण कार्यं कृतम्। २१.०६.२०१७ तः २३.०६.२०१७ पर्यन्तं कालट्यां प्रवृत्तायां शास्त्रसभायां भागः स्वीकृतः।

**डॉ. हरीप्रसाद् के.–** जून्-मासस्य सप्तमदिनाङ्कतः एकादशदिनाङ्कं यावत् संस्थानस्य जयपुरपरिसरे IQAC इत्यस्य NAAC परिचायनसमितेश्च उपवेशने भागमग्रहीत्।

**डॉ. राघवेन्द्र भट्टः–** तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे जून्मासे संवृत्ते प्रशिक्षणवर्गे अध्यापनम् अकरोत्।

**कु. वेङ्कटेशमूर्तिः–** फ्रान्स् देशस्य पेरिस्-नगरे भारतीयदूतावासे २१.०६.२०१७ तमे दिनाङ्के प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां Sanskrit for wisdom, peace and harmony world wide. (ज्ञानाय, विश्वशान्तये सामरस्याय च संस्कृतम्) इति विषयमधिकृत्य पत्रं प्रास्तौत्। पेरिस्नगरे मण्डप-सेणृर्-नामके कलाकेन्द्रे २०.०६.२०१७ तमे दिनाङ्के दुर्योधनगर्वभङ्गनामकम् एकपात्राभिनयं यक्षगानशैल्या प्रास्तौत्। २४.०६.२०१७ तमे दिनाङ्के पेरिस्-अन्ताराष्ट्रियविश्वविद्यालयपरिसरे Maison de Le Inde इत्यत्र प्रवृत्ते संस्कृतदिवसाचरणे पेरिस्नागरिकैः सह बालचरितनाटके तदितरशैक्षिक-सांस्कृतिककार्यक्रमेषु भागमग्रहीत्।

**डॉ. गणेशपण्डितः–** एप्रिल्-द्वितीयदिनाङ्कात् द्वादशदिनाङ्कं यावत् इलाहाबादस्थगङ्गानाथझापरिसरे प्रवृत्ते प्राक्शोधपाठ्यक्रमे 'शैक्षिकानुसन्धानपद्धतिः' इति विषये कक्ष्याः स्वीकृताः। मे मासे प्रवृत्ते केन्द्रीयविद्यालयीयाध्यापकानां सेवाकालिकप्रशिक्षणवर्गे कक्ष्यात्रयं स्वीकृतम्। जून्-मासस्य २१ तमे दिनाङ्के अन्ताराष्ट्रिययोगदिवसस्य संयोजकरूपेण कार्यं कृतम्।

**डॉ. वेङ्कटरमणभट्टः–** मे मासे राजीवगान्धीपरिसरे प्रवृत्तकेन्द्रीयविद्यालयसेवाकालिकप्रशिक्षणवर्गे बोधनं कृतवान्।

**डॉ. सूर्यनारायण भट्टः–** स्वर्णवल्ल्यां शास्त्रार्थसभायां भागग्रहणम्। शृङ्गेरीराजीवगान्धीपरिसरे संस्कृतभारत्या राष्ट्रियसंस्कृतसंस्थानेन च आयोजितस्य महाविद्यालयच्छात्रप्रशिक्षणवर्गस्य संयोजकत्वेन कार्यं निरवहत्। १२.०६.२०१७ तमे दिनाङ्के केरलस्थ-चिन्मयविश्वविद्यापीठे आयोजितायामन्ताराष्ट्रियसङ्गोष्ठ्यां भागमग्रहीत्।

**डॉ. नारायण वैद्यः–** १५.०५.२०१७ तः २६.०५.२०१७ पर्यन्तं राजीवगान्धीपरिसरे केन्द्रीयविद्यालयीयसेवाकालिकप्रशिक्षणवर्गे संसाधकरूपेण भागग्रहणं कृतवान्। ०७.०६.२०१७ तः ०९.०६.२०१७ पर्यन्तं महामस्तकाभिषेककार्यक्रममुपलक्ष्य प्रवृत्ते अखिलभारतीय-संस्कृतविद्वत्सम्मेलने भागग्रहणं कृत्वा "जैनसंस्कृतसाहित्ये पर्यावरणविमर्शः" इति विषयमधिकृत्य पत्रवाचनं कृतवान्।

**डॉ. प्रमोद भट्टः–** २७.०४.२०१७ तः ३१.०४.२०१७ पर्यन्तं शङ्करजयन्तीनिमित्तं शङ्कराचार्यजन्मभूमौ कालट्यां प्रवृत्तायां वाक्यर्थसभायां दिनचतुष्टयम् उपस्थाय "तदोः सः सावनन्त्ययोः" इति सूत्रमधिकृत्य वाक्यार्थमकरोत्। १५.०५.२०१७ तः २६.०५.२०१७ पर्यन्तं राजीवगान्धीपरिसरे प्रवृत्ते केन्द्रीयविद्यालयीयसेवाकालिकप्रशिक्षणवर्गे सहायकत्वेन कार्यं कृत्वा तत्रैव तद्धितविषये, संख्यासंख्येय-विषये, कृदन्तविषये च पाठम् अपाठयत्। ०९.०६.२०१७ तः ११.०६.२०१७ पर्यन्तं राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः तत्र प्रवृत्तशास्त्रार्थप्रशिक्षणवर्गे मञ्जूषाग्रन्थे चतुर्थीपञ्चमीविभक्तिञ्च अपाठयत्। २१.०६.२०१७ तः २३.०६.२०१७ पर्यन्तं शङ्कराचार्यजन्मभूमौ कालट्यां प्रवृत्तायां शास्त्रसभायां शृङ्गेरीजगद्गुरूणां सन्निधौ दिनद्वयं स्थित्वा चिलकूरिक्रोडपत्रमाश्रित्य "नामि" इति सूत्रमधिकृत्य वाक्यार्थं प्रास्तावीत्।

**श्री रवीशः एन्.–** २०१७-१८ वर्षे परिसरेऽस्मिन् प्रवेशार्हाणां छात्राणां कृते शास्त्रदिग्दर्शिनी इति पुस्तकनिर्माणे सहयोगं कृतवान्।

**के.वी. शशीधरः–** १५.०५.२०१७ दिनाङ्कतः २६.०५.२०१७ पर्यन्तं राजीवगान्धीपरिसरे प्रवृत्ते केन्द्रीयविद्यालयीयसेवाकालिकप्रशिक्षणवर्गे संयोजकरूपेण कार्यं कृतम्।

## जयपुरपरिसरवार्ता

### शिक्षाशास्त्रि-शिक्षाचार्यप्रशिक्षूणां छात्राणां समावर्तनकार्यक्रमः



सभाम् उद्बोधयति परिसरप्राचार्यः

परिसरीयशिक्षाशास्त्रविभागे प्रशिक्षणरतानां शिक्षाशास्त्रि-शिक्षाचार्यप्रशिक्षूणां समावर्तनकार्यक्रमः परिसरे अनुष्ठितः। शिक्षाशास्त्रि-पाठ्यक्रमे रतानां समावर्तनकार्यक्रमे मुख्यातिथिरूपेण जयपुरस्थ-परिष्कारसंस्थानां निदेशकः डॉ. राघव प्रकाशः छात्रान् भाविशिक्षकजीवनाय प्रचोदितवान्। शिक्षाचार्यकक्षायाः समावर्तनकार्यक्रमे मुख्यातिथिरूपेण वनस्थलीविद्यापीठस्य शिक्षाविभागाध्यक्षा प्रो. वन्दनागोस्वामीमहोदया समुपस्थिता आसीत्। महोदया भाविशिक्षकाणां समुचितनिर्माणे प्रशिक्षाणस्य भूमिकां प्रतिपादितवती। अनयोः कार्यक्रमयोः अध्यक्षता परिसरप्राचार्येण डॉ. प्रकाश पाण्डेयवर्येण, संयोजनं च शिक्षाशास्त्रविभागाध्यक्षेण प्रो. वाई. एस्. रमेशमहोदयेन कृतम्। कार्यक्रमे विभागीयप्राध्यापकाः सर्वेऽपि प्रशिक्षणार्थिनः सोत्साहं भागं गृहीतवन्तः।

### विश्वपर्यावरणदिवसः

जूनमासस्य पञ्चमे दिनाङ्के परिसरे विश्वपर्यावरणदिवसस्य आयोजनम् अभवत्। कार्यक्रमेऽस्मिन् वनविभागास्य डॉ. खेमराजशर्माणः मुख्यातिथित्वेन उपस्थिताः आसन्। ते स्वस्य विशिष्टोद्बोधने पर्यावरणसंरक्षणस्य उपायान् प्रतिपादितवन्तः। कार्यक्रमस्यास्य संयोजनं डॉ. कैलाशचन्द्रसैनी महोदयेन कृतम्।

### योगकार्यशाला अन्ताराष्ट्रिययोगदिवसाचरणं च


योगकार्यशालायाः एकं दृश्यम्

त्रिवेणीनगरस्थ-राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे द्विदिवसीयाः योगकार्यशालायाः आयोजनं जूनमासस्य एकविंशतिदिनाङ्के अन्ताराष्ट्रिययोगदिवसावसरे अभवत्। अस्यां कार्यशालायां प्रथमसत्रे परिसरीय-प्राध्यापकाः कर्मचारिणः छात्राश्च सामूहिकरूपेण योगाभ्यासं कृतवन्तः।

द्वाविंशतिदिनाङ्के द्वितीयसत्रे योगविषयकपरिचर्चायाः आयोजनं जातम्। अस्य सत्रस्यआध्यक्षपदं परिसरस्य प्राचार्यः डॉ. प्रकाशपाण्डेयः निर्व्यूढवान्। प्राचार्यः प्राचीनतमां भारतीययोगपरम्परां प्रतिपादितवान्। अस्मिन् सत्रे मुख्यातिथिरूपेण परिसरस्य पूर्वप्राचार्येण प्रो. सतीश-कीलावतमहोदयेन योगस्य वैशिष्ट्यं प्रतिपादितम्। कार्यक्रमस्यास्य संयोजनं डॉ. नवनीत महोदयेनसञ्चालनञ्च डॉ. दिनेशयादवमहोदयेन च विहितम्। भारतसर्वकारस्य 'तीन पीढ़ी एक साथ योग करें' सन्देशस्यास्यानुपालनायां परिसरस्य शिक्षाशास्त्रविभागस्य प्राध्यापकः डॉ. दिनेशयादवः स्वस्य पित्रा पुत्रेण च साकं योगाभ्यासं कृतवान्।

# के.जे. सोमैयासंस्कृतविद्यापीठपरिसरवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य क.जे. सोमैयासंस्कृतविद्यापीठाख्ये मुम्बईपरिसरे मुख्यालयस्य निर्देशानुसारं विविधकक्ष्याणां वार्षिका: एवं सत्रार्धपरीक्षा: एप्रिल्मासे सञ्चालिता:। मुक्तस्वाध्यायपीठस्य परीक्षास्तावत् जूनमासे सञ्जाता:।



योगासने निरता: परिसरसदस्या:

### समाचरित: योगदिवस:

प्रतिवर्षमिवास्मिन् वर्षेऽपि जूनमासस्य २१ तमे दिनाङ्के, बुधवासरे परिसरीयचाणक्यभवने अन्ताराष्ट्रियपयोगदिवसमुपलक्ष्य विविधा: कार्यक्रमा: समायोजिता आसन्। तत्र परिसरच्छात्राणामध्यापकानां कार्यालयकर्मचारिणां च सम्पूर्णसहभागित्वे प्रात: काले योगाभ्यास-कार्यक्रम: सुसम्पन्न:। योगविशेषज्ञ: श्रीमान् रविकुमार: योगाभ्यासं प्राशिक्षयत्। तदनु भाषणप्रतियोगिता लेखनप्रतियोगिता च छात्रेभ्य: समायोजिता यत्र शोधच्छात्रा: शिक्षाशास्त्रिणश्च सोत्साहं भागभाज: अभूवन्।

अन्ताराष्ट्रियपयोगसम्मेलनेऽस्मिन् डॉ. देवदत्तसरोदेमहोदयस्य योगशास्त्रीयं व्याख्यानं सङ्गणकाद्युपकरणसहितं विशिष्टमासीत्। समायोजितायां सभाकार्यक्रमेऽस्मिन् मान्या: परिसरप्राचार्या: प्रो. सुदेशकुमारशर्मवर्या: आध्यक्ष्यभणितौ योगस्य प्रासङ्गिकतां स्मारयन्त: राष्ट्रियमहत्त्वमुदघोषयन्। सारस्वतातिथिरूपेण व्याकरणविभागस्याध्यक्षा: प्रो. प्रकाशचन्द्रमहोदया: उपस्थाय योगमहत्त्वं समसूचयन्। कार्यक्रमस्यास्य संयोजक: डॉ. नारायणन् ई. आर्. साहित्यविभागीय: प्राध्यापक: सर्वेभ्य: स्वागतं कार्तज्ञ्यं च व्याहरत्। डॉ. विनोदकुमारशर्मा शिक्षाशास्त्राध्यापक: सभां समचालयत्। अन्ते शान्तिमन्त्रेण सभा सुसम्पन्ना।



नवसङ्कल्पदिवसस्य एकं दृश्यम्

राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य क.जे. सोमैयासंस्कृतविद्यापीठे मुम्बईपरिसरे २०१७-२०१८ सत्रस्यास्य उद्घाटनकार्यक्रम: सरस्वतीपूजनहवनादिभिर्युक्त: जुलाईमासस्य पञ्चमे दिनाङ्के (०५.०७.२०१७) पूर्वाह्णे, चाणक्यभवने समजनि। तत्र डॉ. देवदत्तसरोदेमहोदयस्य पौरोहित्ये सर्वे परिसरीया: सदस्या: भागग्राहिण: प्राचार्याश्च यजमाना: आसन्।

### समाचरित: नवसङ्कल्पदिवस:

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठे मुख्यालयस्य निर्देशानुसारं नवभारतसङ्कल्प: इति विनूतनकार्यक्रम: ०९.०८.२०१७ दिनाङ्कत: ३०.०८.२०१७ पर्यन्तं समायोजि। एतदङ्गतया डॉ. देवदत्तसरोदेमहोदयस्य विशिष्टं व्याख्यानम्, छात्राणां कृते भारतदेशसम्बद्धविषयाणां प्रश्नोत्तरीयकार्यक्रम:, नवभारतनिर्माणस्य शपथग्रहणमित्यादय: कार्यक्रमा: विभिन्नेषु दिनेषु प्राचलन्।

### स्वातन्त्र्योत्सव:

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठपरिसरे ऐषम: स्वातन्त्र्योत्सवसमारोह: अगस्तमासस्य १५ तमे दिनाङ्के समाचरित:।

### स्वच्छतापखवाडासमाचरणम्

सन्मान्यप्रधानमन्त्रिणां नरेन्द्रमोदीवर्याणां निर्देशानुसारं सम्पूर्णेऽस्मिन् भारते स्वच्छताभियानम् इति कार्यक्रम: समाचर्यते। एतदङ्गत्वेन राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरे, क.जे. सोमैयासंस्कृतविद्यापीठाख्ये स्वच्छताकार्यक्रम: पाक्षिक: परिसरीयसदस्यानां सर्वेषां भागग्रहणे ०१.०९.२०१७ दिनाङ्कत: १५.०९.२०१७ पर्यन्तं समाचरित:। ०४.०९.२०१७ दिनाङ्के परिसरीयक्रीडाङ्गणस्य स्वच्छता, ०२.०९.२०१७ दिनाङ्कत: ०३.०९.२०१७ पर्यन्तं छात्रावासस्य स्वच्छता, ०७.०९.२०१७ दिनाङ्के छात्राणां कृते स्पर्धा:, ११.०९.२०१७ दिनाङ्के कक्ष्याप्रकोष्टानां स्वच्छता इत्यादय: विभिन्ना: कार्यक्रमा: प्राचर्याणां प्रो. सुदेशकुमारशर्मणाम् आध्यक्ष्ये, प्रो. प्रकाशचन्द्रमहोदयस्य संयोजकत्वे, डॉ. शङ्कर आन्धलेवर्यस्य शारीरकशिक्षाध्यापकस्य सहसंयोजकत्वे, परिसरीयाणां समेषामुपस्थितौ समायोजिषत।

### विशिष्टव्याख्यानम्

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरस्य क.जे. सोमैयासंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागे छात्राणां शिक्षणाभ्यसं प्रशिक्षूणां चोपलक्ष्य व्याकरणांशेषु प्रधानस्य सन्धिविषयस्य विशिष्टव्याख्यानकार्यक्रम: समायोजित: यस्मिन् परिसरस्यास्य व्याकरणविभागे वरिष्ठाचार्य: व्याकरणभूषण: प्रो. बोधकुमारझावर्य: व्याख्यात्।

परिसरवार्ता

## शिक्षकदिवसः



शिक्षकदिवसे समासीनाः अतिथयः

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठे ऐषमः शिक्षकदिवस-समारोहः सप्तम्बरमासस्य ६ दिनाङ्के अपराह्णे समारब्धः यस्मिन् मुख्यातिथिः भाण्डुपस्थकेन्द्रीयविद्यालयस्य प्राचार्या श्रीमती प्रमीला पालमहाभागा, अध्यक्षः प्रो. प्रकाशचन्द्रः, प्रभारिप्राचार्यः, व्याकरणविभागाध्यक्षः, प्रो. मदनमोहनझावर्यः, शिक्षाशास्त्र-विभागाध्यक्षः, संयोजकः डॉ. सुनीलकुमारशर्मा, शिक्षाशास्त्रप्राध्यापकः, सञ्चालकः डॉ. विनोदकुमारशर्मा, शिक्षाशास्त्रप्राध्यापकः च आसीत्। एवमेव पूर्वाह्णे प्रथमवर्षीय-शिक्षाशास्त्रिणां स्वागतकार्यक्रमं शिक्षाशास्त्रविभागे विभागाध्यक्षाणां मार्गदर्शने द्वितीयवर्षीयाः अकार्षुः।

## भाषाबोधनवर्गः

शिक्षाशास्त्रविभागे नूतनतया आगतानां छात्राणां कृते संस्कृतसम्भाषणशिबिरमेवम् एकविंशतिदिनात्मकः भाषाबोधनवर्गः इति विशिष्टः कार्यक्रमः २०.०७.२०१७ तमे दिनाङ्के पूर्वाह्णे समुदघाटि। अस्मिन् कार्यक्रमे नूतनतया भोपालपरिसरतः परिसरमिमं स्थानान्तरणेनागतानाम् आचर्याणां भारतभूषणमिश्रवर्याणां स्वागतं च व्यधायि। सन्दर्भेऽस्मिन् परिसरीयाणां सर्वेषामुपस्थितौ प्राचार्यः प्रो. सुदेशकुमारशर्ममहोदयः अध्यक्षः, प्रो. मदनमोहनझावर्यः शिक्षाशास्त्रविभागाध्यक्षः, डॉ. देवदत्तसरोदेवर्यः संयोजकः, शिबिरशिक्षिका कु. मुग्धादाते डॉ. कुमारः सञ्चालकः आसीत्।

## समाचरितः संस्कृतसप्ताहः



सभां संबोधयति परिसरप्राचार्यः

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठे ऐषमः संस्कृतसप्ताहसमारोहः अगस्तमासस्य ८ दिनाङ्कादारभ्य ११ दिनाङ्कं यावत् वैभवेन प्रावर्तत। समारोहस्यास्य उद्घाटनं परिसरप्राचार्याणाम् आचार्याणां सुदेशकुमारशर्मणाम् आध्यक्ष्ये ८ दिनाङ्के अपराह्णे सम्पन्नम्। कार्यक्रमेऽस्मिन् राष्ट्रपतिपुरस्कारविभूषितः प्रो. सुद्युम्न आचार्यवर्यः मुख्यातिथिपदमलङ्कृत्य वैदिकविज्ञानसम्बद्धं विशिष्टं व्याख्यानं प्रास्तौत्। विशिष्टातिथि-पदविभूषिता राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरात् समागता आचार्या भगवतीसुदेशवर्या समवेतान् सर्वानुद्दिश्य समुदबोधयत्। साहित्यविभागप्राध्यापकः डॉ. स्वर्गकुमारमिश्रवर्यः कार्यक्रममेनं सुचारु समचालयत्।

अगस्तमासस्य ९ दिनाङ्के महाविद्यालयच्छात्राणां परिसरच्छात्राणाञ्च कृते विभिन्नाः स्पर्धाः समायोजिताः। तत्र च वरिष्ठवर्गच्छात्राणां कृते भाषणकथालेखनस्पर्धे, कनिष्ठवर्गच्छात्राणां कृते भाषणस्पर्धा, अष्टाध्यायीकण्ठपाठस्पर्धा, अमरकोषकण्ठपाठस्पर्धा च समायोजिता। सर्वास्वेतासु स्पर्धासु सर्वेऽपि परिसरच्छात्राः सोत्साहं भागमगृह्णन्।

अगस्तमासस्य १० दिनाङ्के पूर्वाह्णे वाक्यार्थवैभवम् इति नाम्ना अध्यापकच्छात्रशोधार्थिनां वाक्यार्थसभा परिसरप्राचार्याणाम् आचार्याणां सुदेशकुमारशर्मणाम् आध्यक्ष्ये प्रावर्तत। सभायामस्यां साहित्यविभागाध्यक्षः आचार्यः ई.एम्. राजन्वर्यः न्यायशास्त्रे, साहित्यविभागे सहायकाचार्यः डॉ. ई.आर्. नारायणन्वर्यः व्याकरणे, साहित्यविभागे प्राध्यापकः डॉ. स्वर्गकुमारमिश्रवर्यः साहित्ये, साहित्यविभागे प्राध्यापकः डॉ. एम्. सुदर्शनचिपळूणकरवर्यः साहित्ये, शिक्षाशास्त्रविभागे प्राध्यापकः डॉ. कुमारवर्यः व्याकरणे, शोधच्छात्रा कु. विदुषी बोल्ला व्याकरणे, आचार्यप्रथमवर्षच्छात्रा कु. निनदा साहित्ये च वाक्यार्थं प्रास्तुवन्। शिक्षाशास्त्रविभागप्राध्यापकः डॉ. कुमारवर्यः सभामिमां समचालयत्।



संस्कृतसप्ताहकार्यक्रमे आसीनाः अतिथयः

अगस्तमासस्य १० दिनाङ्के प्राचीनभारतीयखगोलशास्त्रम् इति विषयमधिकृत्य परिसरप्राचार्याणाम् आचार्याणां सुदेशकुमारशर्मणाम् आध्यक्ष्ये सङ्गणकीयप्रस्तुतिद्वारा (PPT) डॉ. मोहन आप्टेवर्यस्य विशिष्टव्याख्यानं प्रावर्तत। कार्यक्रमेऽस्मिन् सोमैयान्यासस्य अध्यक्षः श्री समीर एस्. सोमैयावर्यः मुख्यातिथिरूपेण, सारस्वतातिथिरूपेण भिषग्वरा डॉ. राखीठक्करवर्या च समुपस्थिताऽसीत्।

विद्वत्सम्माननम् - संस्कृतसप्ताहसमारोहावसरेऽस्मिन् संस्कृतक्षेत्रे विभिन्नानां तन्त्रांशानां निर्माणं कृतवतः शिक्षाशास्त्रविभागाध्यक्षस्य आचार्यस्य मदनमोहनझावर्यस्य सम्माननं परिसरप्राचार्यः अकरोत्।



अतिथिसभाजनस्य दृश्यम्

अगस्तमासस्य ११ दिनाङ्के पूर्वाह्णे विद्यालयच्छात्राणां कृते गीताकण्ठपाठस्पर्धा संस्कृतभाषणस्पर्धा च समायोजिता। विभिन्नेभ्यः विद्यालयेभ्यः समागताः छात्राः सोत्साहं भागमगृह्णन्। पूर्वाह्णे ११ वादने योगः आयुर्वेदश्च इति विषयमधिकृत्य भारतीय-चिकित्सापद्धतौ कृतभूरिपरिश्रमायाः भिषग्वरायाः डॉ. राखीठक्करमहाभागायाः विशिष्टं व्याख्यानं सङ्गणकीयप्रस्तुतिद्वारा (PPT) प्रावर्तत।

अगस्तमासस्य ११ दिनाङ्के अपराह्णे दिनचतुष्टयव्यापिनः संस्कृतसप्ताहसमारोहस्य सम्पूर्तिसत्रं पुरस्कारवितरणञ्च परिसरप्राचार्याणामाचार्याणां सुदेशकुमारशर्मणाम् आध्यक्ष्ये सुसम्पन्नम्। कार्यक्रमेऽस्मिन् कर्णाटकसंस्कृत-विश्वविद्यालयस्य कुलपतिचरः आचार्यः श्रीनिवासवरखेडीवर्यः मुख्यातिथिरूपेण, विशिष्टातिथिरूपेण आचार्या भगवतीसुदेशवर्या च समुपस्थिताऽसीत्। कार्यक्रमेऽस्मिन् मञ्चोपस्थिताः विद्वांसः पुरस्कारभाजां छात्राणां पुरस्कारवितरणमकुर्वन्। सन्दर्भेऽस्मिन् शिक्षाशास्त्र-विभागाध्यक्षस्य आचार्यस्य मदनमोहनझावर्यस्य स्वनिर्मितानां विभिन्नानां तन्त्रांशानां प्रस्तुतिकार्यक्रमः प्रावर्तत।

विशिष्टाभिनन्दनम्-संस्कृतसप्ताहस्य सम्पूर्तिसमारोहसन्दर्भेऽस्मिन् बहूनां वर्षाणामुत्तमसेवानिमित्तं कार्यालयकर्मचारी श्री ईसमसिंगवर्यः परिसरप्राचार्यद्वारा सभाजितोऽभूत्। साहित्यविभागप्राध्यापकेन डॉ. एम्. सुदर्शनचिपळूणकरवर्येण कार्यक्रमोऽयं सञ्चालितः। शान्तिमन्त्रेण संस्कृतसप्ताहसमापनसमारोहः समाप्तिमगात्। सर्वेष्वप्येतेषु कार्यक्रमेषु संस्कृतसप्ताहसमारोहस्य संयोजकः व्याकरणविभागाध्यक्षः आचार्यः प्रकाशचन्द्रवर्यः समुपस्थाय सुचारु मार्गदर्शनमकरोत्।



विशिष्टाभिनन्दनं कुर्वन्तः अतिथयः

## सम्पन्ना संस्कृतविज्ञानकार्यशाला

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरेण स्वीकृतासु परियोजनास्वन्यतमा संस्कृतविज्ञानपरियोजना। अस्यां परियोजनायां कृतानि कार्याणि चर्चयितुम् अग्रिममार्गदर्शनं च प्राप्तुं विषयविशिष्टविदुषां कार्यशालैका ०६.०९.२०१७ तः ०९.०९.२०१७ पर्यन्तं डॉ. देवदत्तसरोदेवर्यस्य संयोजकत्वे समायोजिता। तत्र प्रो. सुद्युम्न आचार्यः, प्रो. पी.पी. होले, प्रो. चन्द्रगुप्त वर्णेकरः, प्रो. मल्हार कुल्कर्णी, प्रो. गणेशः, डॉ. रवीन्द्रनाथः, डॉ. के. महेशः, प्रो. इन्दिरा प्रियदर्शिनी, डॉ. अश्विन सावन्तः, डॉ. अमित घोडके प्रभृतयः अनेके भागग्रहणमकुर्वन्।

## हिन्दीपखवाडाकार्यक्रमः

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठे प्रतिवर्षमिवास्मिन् वर्षे हिन्दीपखवाडासमारोहः १४.०९.२०१७ दिनाङ्के डॉ. श्रीमती रेखा शर्मा, उपप्राचार्या, विभागाध्यक्षा, भवन्स-महाविद्यालयस्य इत्यस्याः मुख्यातिथ्ये, परिसरप्राचार्याणां प्रो. सुदेशकुमार-शर्मणामाध्यक्षे, परिसरीयाणां समेषामुपस्थितौ समुद्घाटि। एतदङ्गतया १८-१९ दिनाङ्कयोः छात्रणां कृते सचित्रसूचनापत्रकनिर्माणम्, निबन्धलेखनम्, इति स्पर्धे समायोजिते।

## पण्डितदीनदयाल उपाध्यायजन्मशताब्दिकार्यक्रमः

भारतसर्वकारस्यादेशानुसारं राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयेन प्रप्तनिर्देशोऽयं परिसरः मुम्बईस्थः, क.जे. सोमैयासंस्कृतविद्यापीठाख्यः पण्डितदीनदयाल-उपाध्यायानां जन्मशताब्दिकार्यक्रमं १४.०९.२०१७ दिनाङ्कतः २०.०९.२०१७ पर्यन्तं समायोजयत्। एतदङ्गत्वेन छात्रेभ्यः स्पर्धाः, पण्डितदीनदयाल-उपाध्यायानां जीवनवृत्तचित्रप्रदर्शनम् इत्यादयः विभिन्नाः कार्यक्रमाः प्राचर्याणां प्रो. सुदेशकुमारशर्मणाम् आध्यक्ष्ये, प्रो. प्रकाशचन्द्रमहोदयस्य संयोजकत्वे, डॉ. शङ्कर आन्धलेवर्यस्य शारीरकशिक्षाध्यापकस्य सहसंयोजकत्वे, परिसरीयाणां समेषामुपस्थितौ समायोजिषत।

प
रि
स
र
वा
र्ता

# गुरुवायूरपरिसरवार्ता

## योगशिबिरम् आयोजितम्

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरेण तृतीय-अन्ताराष्ट्रिय-योगदिनम् उद्दिश्य दशदिनानां (०३.०७.२०१७ त: १४.०७.२०१७ पर्यन्तम्) योगशिबिरं समायोजि। तत्र सर्वेऽपि कर्मचारिण: शैक्षिका: शैक्षिकेतराश्च भागमगृह्णन्। एषु दिनेषु विंशति: कर्मचारिण: सायंकाले ४ वादनत: ५ वादनपर्यन्तं विद्यापीठसभाङ्गणे सम्भूय योगमभ्यस्तवन्त:। विद्यापीठीयस्य डिप्लोमा-प्रणाली (कोर्स्) अध्यापकस्य श्रीधनेशमहोदयस्य शिक्षणे तच्छिष्याया: शास्त्रि-द्वितीयवर्षीयाया: अरुन्धत्याश्च निर्देशने कर्मचारिण: योगम् अधिगतवन्त:।



योगशिबिरोद्घाटनस्य एकं दृश्यम्

## संस्कृतसप्ताहसमारोह: समनुष्ठित:

०४.०८.२०१७ त: १०.०८.२०१७ पर्यन्तं, संस्कृतसप्ताहसमारोह: समाचरित:। ०४.०८.२०१७ तमे दिने कञ्चीपुरस्थ-श्रीचन्द्रशेखरसरस्वतीविश्वविद्यालयस्य कुलपतय: आचार्या: विष्णुपोट्टि-महाभागा: कार्यक्रमस्यास्य उद्घाटनमकुर्वन्। तस्मिन्नेव दिने अपराह्णे आधुनिकसमाजे अद्वैतवेदान्तस्योपयोगिता इत्यस्मिन् विषये डॉ. सुवर्णा नालप्पाट्टवर्या: विशिष्टं व्याख्यानम् अकार्षु:। ०५.०८.२०१७ तमे दिने व्याकरणादिशास्त्रेषु सङ्गोष्ठी प्राचलत्, यत्र परिसरीयाध्यापका: भागमगृह्णन्। ०६.०८.२०१७ दिने वैदिकसत्रे वेदविशारदा: अध्यापका: वेदपाठका: छात्राश्च वेदवाचनम् अकुर्वन्। ०७.०८.२०१७ एवं ०८.०८.२०१७ दिनयो: परिसरच्छात्राणां कृते संस्कृतगीतगान-कण्ठपाठ-निबन्धलेखन-भाषण-रसप्रश्नस्पर्धा: समायोजिता:। ०९.०८.२०१७ दिने अन्यविद्यालयीयच्छात्राणां कृते विविधा: स्पर्धा: समयोजिता:। १०.०८.२०१७ तमे दिने प्रात: वाक्यार्थविचार: आसीत्। तत्र विशिष्य छात्रा:, वाक्यार्थं प्रास्तुवन्, तस्यां सभायाम् आचार्या: रामकृष्णभट्टमहाभागा: सभाध्यक्ष्यं निरवहन्। तस्मिन् दिने अपराह्णे समापनसमारोहे पूज्यशारदानन्दस्वामिपादा: मुख्यभाषणम् अकुर्वन्। इत्थं सप्ताहे सर्वेषु कार्यक्रमेषु आचार्याणां प्राचार्याणां प्रो.च.ल.ना. शर्मणां प्रोत्साहनमेव समेषामध्यापकानां छात्राणां कर्मचारिणां च बलमासीत्।




योगासननिरत: छात्र:

## स्वातन्त्र्यदिनोत्सव:

१५.०८.२०१७ तमे दिने भारतस्य ७१तम: स्वातन्त्र्यदिनोत्सव: आचरित:। प्रभारि-प्राचार्यै: डॉ. के.पि. केशवन् महाभागै: राष्ट्रियपताकाया: आरोपणं कृतमासीत्। तत्र अध्यापकै: छात्रै: च भागग्रहणं स्वीकृतमासीत्।

## ओणोत्सव:

३०.०८.२०१७, ३१.०८.२०१७ दिवसयो: केरलीयराज्योत्सवस्य ओणोत्सवस्य आचरणं परिसरे कृतमासीत्। तत्र पौष्पीरङ्गवल्लीस्पर्धा, तिरुवातिरकली, रज्वाकर्षणस्पर्धा इत्यादय: बह्व्य: स्पर्धा: आयोजिता:।

वेलियनाड् श्री आदिशङ्करनिलये प्रवर्तमाने अन्ताराष्ट्रियचिन्मयशोधसंस्थाने समायोजितासु संस्कृतसप्ताहान्तर्गतस्पर्धासु एते गुरुवायूरपरिसरीयच्छात्रा: पुरस्कारार्हा: अभवन्।

१. भानुमतिदास् – शिक्षाशास्त्रिप्रथमवर्षस्य छात्रा – आशुभाषणे – प्रथमपुरस्कार:, वाक्स्पर्धायां – द्वितीयपुरस्कार:, कथारचनायां – तृतीयपुरस्कार: च

२. वैशाख: एम् – शास्त्रितृतीयवर्षस्य छात्र: – निबन्धलेखने – प्रथमपुरस्कार:, प्रश्नोत्तरीस्पर्धायां – तृतीयपुरस्कार:

३. दीपज्योति देब् – शास्त्रितृतीयवर्षस्य छात्र: – कथारचनायां – प्रथमपुरस्कार:, निबन्धलेखने – द्वितीयपुरस्कार:, प्रश्नोत्तरीस्पर्धायां – तृतीयपुरस्कार:

४. सुजेश: इ. के. – प्राक्शास्त्रिद्वितीयवर्षस्य छात्र: – आशुभाषणे – प्रथमपुरस्कार:, जीना. के. एम् – प्राक्शास्त्रिद्वितीयवर्षस्य छात्रा – आशुभाषणे – द्वितीयपुरस्कार:

## पण्डितस्य दीनदयाल उपाध्यायस्य शतमानोत्सव: समाचरित:

१४.०८.२०१७ तमे दिने पण्डितस्य दीनदयाल उपाध्यायस्य शतमानोत्सव: आचरित:। तत्र प्रभारिप्राचार्य: डॉ. के.पि.केशवन्-महाभाग: आध्यक्ष्यं निरवहत्। वेदान्तविभागाध्यक्षया डॉ. आर्. प्रतिभामहाभागया दीनदयाल उपाध्यायमहोदयानां स्वातन्त्र्यसमरावसरे योगदानम् इति

परिसरवार्ता

विषयमधिकृत्य मुख्यभाषणं विहितम्। डॉ. के.के. हर्षकुमारमहोदयेन स्वागतीकरणम्, एवं डॉ. रम्या.पि.आर् महोदयया धन्यवादभाषणञ्च कृतम्। पञ्चषैः छात्रैः पत्रप्रस्तुतीकरणमपि कृतमासीत्।

### स्वच्छभारतपक्षाचरणम्

१४.०९.२०१७ एवं १५.०९.२०१७ दिनयोः स्वच्छभारतकार्यक्रममालक्ष्य परिसरीयसदस्यैः परिसरच्छात्रावासयोश्च स्वच्छता सम्पादिता।

### हिन्दीपक्षसमारोहः

११.०९.२०१७ तमे दिने ऐषमः हिन्दीपक्षसमारोहः परिसरीयप्राचार्यैः आचार्यैः सि.एच्.एल्.एन्. शर्ममहाभागैः समुद्घाटितः। विविधैः विभागाध्यक्षैः भाषणं कृतमासीत्। छात्राणां कृते हिन्दीवाचनं, प्रबन्धरचनं, भित्तिपत्रनिर्माणं, रसप्रश्नस्पर्धा इत्यादयः स्पर्धाः, कर्मचारिणां कृते हिन्दीभाषायामनुवादः, टङ्कणम् इत्यादयः स्पर्धाश्च आयोजिताः।

## भोपालपरिसरवार्ता

### योगदिवसस्य आयोजनम्


योगासने निरतः परिसरपरिवारः

परिसरद्वारा २१ जून, २०१७ तमे दिनाङ्के योगदिवसः आयोजितः। कार्यक्रमेऽस्मिन् अध्यक्षः परिसरप्राचार्यः प्रो.एम्. चन्द्रशेखरः, मुख्यवक्ता भोपालस्थस्य संस्कारवैली विद्यालयस्य योगगुरुः श्रीरत्नेशपाण्डेयः च समुपस्थितौ आस्ताम्। कार्यक्रमेऽस्मिन् प्राध्यापकैः योगासनस्य अभ्यासः आचरितः। 'योग परम्परा व इसके लाभ' अस्मिन् विषये श्रीरत्नेशपाण्डेयेन स्वविचाराः प्रकटिताः। परिसरप्राचार्येण राष्ट्रनिर्माणाय भारतस्य समस्ताः नागरिकाः स्वस्थाः, सुदृढाश्च स्युरिति प्रार्थना अभिव्यक्ता। कार्यक्रमेऽस्मिन् धन्यवादज्ञापनं डॉ. कैलाशचन्द्रदाशेन, सञ्चालनं श्रीसुमितसक्सेनावर्येण च सम्पादितम्।

### प्रो. भारतभूषणमिश्रवर्यस्य सौप्रस्थानिकसमारोहः

जुलाई-मासस्य १० दिनाङ्के ज्योतिषविभागस्य प्रो. भारतभूषणमिश्रमहावर्यस्य सौप्रस्थानिककार्यक्रमः समायोजितः। भोपालपरिसरतः मुंबईपरिसरं प्रति स्थानान्तरणप्रसङ्गे कार्यक्रमोऽयम् आयोजितः। समुपस्थितप्राध्यापकैः प्राचार्येण च मिश्रवर्यस्य स्मृतिसौहार्दभावनाः प्रकटिताः, भाविजीवनाय उत्तमशुभकामनाश्च प्रार्थिताः। कार्यक्रमस्यास्य आध्यक्ष्यं प्रो. एम्. चन्द्रेशेखरमहोदयेन विहितम्।

### डॉ. नीलाभतिवारिमहोदयस्य सौप्रस्थानिकसमारोहः

डॉ. नीलाभतिवारिमहोदयस्य सौप्रस्थानिककार्यक्रमः परिसरपरिवारेण १४.०७.२०१७ तमे दिनाङ्के आयोजितः। स्थानान्तरणप्रसङ्गे शिक्षाशास्त्रविभागेन आयोजितकार्यक्रमे सर्वे प्राध्यापकाः, कर्मचारिणश्च उपस्थिताः आसन्। प्राचार्येण समुपस्थितप्राध्यापकैः च तिवारिवर्यस्य भोपालपरिसरस्य विकासाय कृतकार्याणां बहुविधकार्यकुशलतानाञ्च प्रेरकप्रसङ्गाः अभिव्यक्ताः। कार्यक्रमस्यास्य अध्यक्षः प्रो. एम्. चन्द्रशेखर-महोदयः आसीत्।

### संस्कृतसप्ताहकार्यक्रमस्य शुभारम्भः

अगस्तमासस्य ०४ दिनाङ्के संस्कृतसप्ताहस्य शुभारम्भकार्यक्रमः भवभूतिप्रेक्षागारे समायोजितः। समारोहेऽस्मिन् मुख्यातिथिरूपेण श्रीब्रजभूषणशर्मा, आई.पी.एस., अतिरिक्तः आरक्षकमहानिदेशकः, भोपालम्, विशिष्टातिथिरूपेण डॉ. ज्ञानचतुर्वेदी, एम.डी. नोबल चिकित्सालयः, भोपालम्, अध्यक्षरूपेण परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरश्च सुशोभिताः आसन्। व्याकरणविभागाध्यक्षः प्रो. सुबोधशर्म-महोदयः स्वागतभाषणम् अकरोत्। शर्ममहोदयेन संस्कृतसाहित्यस्य गौरवशालिपरम्परा साभिप्रेरणं प्रकटिता। श्रीब्रजभूषणशर्म-डॉ. ज्ञान-चतुर्वेदिमहोदययोः उद्बोधने संस्कृतस्य गौरवशालिनी प्रतिष्ठा प्रकटिता। अध्यक्षीयोद्बोधने प्रो. एम्. चन्द्रशेखरमहोदयेन संस्कृत-शास्त्राध्यापनाध्ययनपरम्परायाः तत्सम्बद्धनिष्ठानिरन्तरतापरिणामानां सुन्दरविश्लेषणं प्रस्तुतमिह। शिक्षाविभागस्य डॉ. श्रीगोविन्दपाण्डेयेन धन्यवादज्ञापनमभिव्यक्तम्। कार्यक्रमस्य सञ्चालनं साहित्यविभागस्य डॉ. सनन्दनकुमारत्रिपाठिना कृतम्।

### संस्कृतसप्ताहकार्यक्रमस्य समापनम्

अगस्तमासस्य १० दिनाङ्के संस्कृतकविसमवायकार्यक्रमः समायोजितः। प्राध्यापकैः, विद्यार्थिभिश्च स्वरचितकाव्यानां पाठः प्रस्तुतः। समारोहेऽस्मिन् मुख्यातिथिरूपेण डॉ. राजेश गुप्ता, आई.पी.एस्., कुलसचिवः, साँची-बौद्ध भारतीयज्ञानाध्ययनविश्वविद्यालयः,

विशिष्टातिथिरूपेण डॉ. धर्मेन्द्रशर्मा, जिलाशिक्षाअधिकारी, भोपालम्, अध्यक्षरूपेण परिसरप्राचार्य: प्रो. एम्. चन्द्रशेखरश्च सुशोभिता: आसन्। ज्योतिषविभागाध्यक्ष: प्रो. हंसधरमहोदय: स्वागतभाषणम् अकरोत्। अपराह्णे संस्कृतसप्ताहमहोत्सवस्य समापनसमारोह: सम्पन्न:। कार्यक्रमेऽस्मिन् श्री चन्द्रमादास त्यागिमहाराज: संस्कृतसंरक्षक:, डॉ. शिवदत्त मिश्र:, डॉ. प्रभातराजतिवारी, प्रो. जे. भानुमूर्ति:, प्रो. सुबोध शर्मा च संस्कृतसेवार्थं संस्कृतभूषणोपधिना सम्मानिता:। समापनकार्यक्रमे डॉ. सोमनाथ साहू धन्यवादज्ञापनं प्रस्तुतवान्, डॉ. श्रीगोविन्दपाण्डेय: सञ्चालक: आसीत्।



संस्कृतसप्ताहकार्यक्रमे विराजमाना: अतिथय:

## स्वतन्त्रतादिवसकार्यक्रम:

स्वतन्त्रतादिवसमुपलक्ष्यपरिसरे प्रात: ९ वादने ध्वजारोहणम्, राष्ट्रगानञ्च विहिते। ध्वजारोहणस्य अनन्तरं परिसरप्राचार्यै: प्रो. एम्. चन्द्रशेखरमहोदयै: समुपस्थितेभ्य: प्राध्यापकेभ्य:, प्राध्यापिकाभ्य:, कर्मचारिभ्य:, छात्राभ्यश्च आशीर्वचांसि शुभकामना: च अभिव्यक्ता: सानन्दं कार्यक्रमोऽयं सम्पन्न: समायोजितश्च।

## पण्डितदीनदयाल उपाध्यायजन्मशताब्दीवर्षमुपलक्ष्य कार्यक्रम:

पण्डितदीनदयाल उपाध्यायस्य जन्मशताब्दीवर्षमुपलक्ष्य कार्यक्रम: परिसरे अगस्तमासस्य २२ तमे दिनाङ्के आयोजित:। समारोहेऽस्मिन् मुख्यातिथिरूपेण श्री अनिल सौमित्र:, मीडियाप्रभारी भारतीयजनतापार्टी भोपालम्, अध्यक्षरूपेण परिसरप्राचार्य: प्रो. एम. चन्द्रशेखरश्च समुपस्थितौ। डॉ. श्रीगोविन्दपाण्डेयेन स्वागतभाषणं विहितम्। मुख्यातिथि: स्वभाषणे उक्तवान् यत् वयं दीनदयाल उपाध्यायस्य जीवनस्य अभिप्रेरणां स्वीकुर्म:, अध्यक्षीयोद्बोधने प्रो. एम्. चन्द्रशेखरमहोदयेन अपि दीनदयाल उपाध्यायस्य विशिष्टा: पक्षा: प्रकाशिता:। व्याकरणविभागस्य डॉ. प्रदीपपाण्डेयेन धन्यवादज्ञापनमभिव्यक्तम्। कार्यक्रमस्य प्रभाविसञ्चालनम् आधुनिकविभागस्य डॉ. अवनिशर्ममहोदयया कृतम्।

समापनसमारोह: अगस्तमासस्य २४ तमे दिनाङ्के आयोजित:। समारोहेऽस्मिन् मुख्यातिथिरूपेण डॉ. अशोक वार्ष्णेय:, राष्ट्रियसंगठनसचिव:, आरोग्यभारती, भोपालम्, अध्यक्षरूपेण परिसरप्राचार्य: प्रो. एम्. चन्द्रशेखरश्च समुपस्थितौ। आधुनिकविभागास्य डॉ. विवेकसिंहेन स्वागतभाषणं विहितम्। आधुनिकविभागास्य डॉ. अर्चनाचौहानमहोदयया धन्यवादज्ञापनमभिव्यक्तम्। कार्यक्रमस्य प्रभाविसञ्चालनं शिक्षाविभागस्य डॉ. सोमनाथसाहुमहोदयेन कृतम्। अस्मिन् अवसरे निबन्धभाषणदेशभक्तिगीतप्रतियोगितासु विजेतार: प्रतिभागिन: पुरस्कृता:।

## स्वच्छताभियानम्

सितम्बरमासस्य १ त: १५ दिनाङ्कपर्यन्तं परिसरे स्वच्छताकार्यक्रम: आयोजित:। परिसरप्राचार्य: प्रो. एम्. चन्द्रशेखरश्च कार्यक्रमस्य औचित्यं प्रतिपादितवान्। विद्यार्थिभि: साकं अन्त:क्रियायां जीवनस्य मुख्यमूल्यस्वच्छता वर्तते इति शिक्षा संचारिता। अनन्तरं प्राध्यापकै:, विद्यार्थिभि: च सह परिसरस्य स्वच्छताया: संकल्प: आत्मीकृत:। कार्यात्मकदृष्ट्या परिसरे वृक्षारोपणं कृतम्। परिसरस्य बाह्यक्षेत्रस्य स्वच्छता कृता।


वृक्षारोपणं करोति परिसरप्राचार्य:

## वार्षिकप्रतियोगिता

भोपालपरिसरे सितम्बरमासस्य ०४ त: १४ दिनाङ्कपर्यन्तं विभिन्नशैक्षिक-सांस्कृतिक-क्रीडाप्रतियोगिता: आयोजिता:। एतासु प्रतियोगितासु विद्यार्थिनां चयनम् आयोजिष्यमाणाय आगमियुवमहोत्सवाय जातम्। भोपालपरिसरस्य प्राध्यापिकानां प्राध्यापकानाञ्च सहयोगेन परिसरे बालक-बालिकावर्गयो: कनिष्ठ-वरिष्ठवर्गयोश्च विभिन्ना: पाठ्यसहगामिप्रतियोगिता: समायोजिता:। विद्यार्थीनाञ्चयनम् आगामिशास्त्रीयस्पर्धासु भागग्रहणाय अपि कृतम्।

## राधाकृष्णस्मृतिव्याख्यानमाला

सितम्बरमासस्य ५ दिनाङ्के डॉ. राधाकृष्णस्मृतिव्याख्यानमालोपक्रमे शिक्षकदिवसावसरे समायोजिते कार्यक्रमे भोपालस्थस्य अटलविहारी वाजपेयीहिन्दीविश्वविद्यालयस्य कुलपति: प्रो. रामदेवभारद्वाज:, मुख्यातिथि: श्री रमेशशर्मा, राष्ट्रियैकतासमिति:, मध्यप्रदेश: चास्ताम्। अस्य कार्यक्रमस्य अध्यक्ष: परिसरप्राचार्य: प्रो. एम्. चन्द्रशेखर: चासीत्। प्रो. प्रभादेवीचौधरीमहोदयया स्वागतभाषणं, डॉ. सोमनाथसाहुवर्येण धन्यवादज्ञापनञ्च प्रस्तुते। कार्यक्रमस्यास्य व्यवस्थितसञ्चालनं डॉ. नागेन्द्रनाथझा विहितवान्। परिसरस्य समस्तविद्यार्थिनां कृते कार्यक्रमोऽयम् उपाकरोत्।

## त्रैमासिकफलित-ज्योतिषपरिचयपाठ्यक्रमः वास्तुशास्त्रपाठ्यक्रमश्च



कार्यशालायां समवेताः विद्वांसः

सितम्बरमासस्य ०८ तः २० दिनाङ्कपर्यन्तं मुक्तस्वाध्यायपीठेन ज्योतिष-पाठ्यसामाग्रीणां सम्पादनाय, संशोधनाय च विशिष्टा कार्यशाला अयोजिता अभवत्। अस्यां कार्यशालायां दूरस्थमाध्यमेनसंस्कृतशिक्षायाः प्रचाराय प्रसाराय च महत्त्वपूर्णसङ्कल्पः स्वीकृतः। अस्याः कार्यशालायाः अध्यक्षरूपेण परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरमहोदयः, कार्यशालासमन्वयकरूपेण आचार्यः हंसधरझामहोदयश्च समलङ्कृतवन्तौ।

## डॉ. कालिकाप्रसादशुक्लमहोदयस्य सौप्रस्थानिकसमारोहः

भोपालपरिसरतः एकलव्यपरिसरं प्रति स्थानान्तरणप्रसङ्गे सितम्बरमासस्य ०८ दिनाङ्के शिक्षाशास्त्रविभागस्य डॉ. कालिकाप्रसादशुक्लमहोदयस्यसौप्रस्थानिककार्यक्रमः विभागे समायोजितः। प्राचार्येण, विभागस्य समुपस्थितप्राध्यापकैश्च शुक्लवर्यस्य छात्रवत्सलस्य, शिक्षणशिक्षणेतरकार्यक्रमेषु च कुशलतायाः, सहयोगस्य च स्मरणं विहितम्। आगामिजीवनाय उत्तमशुभकामनाश्च प्रकटिताः। कार्यक्रमस्यास्य आध्यक्ष्यं प्रो. एम्. चन्द्रशेखरमहोदयेन विहितम्।

## हिन्दी-पखवाड़ाकार्यक्रमस्य आयोजनम्

सितम्बरमासस्य १४ तः १९ पर्यन्तं हिन्दीपखवाड़ाकार्यक्रमस्यायोजनं कृतम्। अस्य कार्यक्रमस्य १४ दिनाङ्के आयोजिते उद्घाटनसमारोहे मुख्यातिथिः हिन्दीसाहित्यकारः पद्मश्री श्रीरमेशचन्द्रशाहः, विशिष्टातिथिः श्री देवेशकुमारत्यागी, अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः च समलङ्कृताः। त्यागीमहोदयेन हिन्दीभाषायाः प्रयोग-व्यवहाराश्च सम्प्रेषिताः। शाहवर्येण हिन्दीभाषायाः समकालिकतैतिहासिकते व्याख्याते। परिसरप्राचार्येणापि हिन्दीभाषायाः विशिष्टतथ्यानि प्रकटितानि। हिन्दीपखवाड़ासंयोजिकया डॉ. अर्चनादुबेमहोदयया स्वागतभाषणं, डॉ. अर्चनाचौहानमहोदयया धन्यवादज्ञापनञ्च प्रस्तुते। कार्यक्रमस्य कुशलसञ्चालनं डॉ. नितिनजैनः कृतवान्।

अस्य कार्यक्रमस्य समापनसमारोहः १९ दिनाङ्के समायोजितः। मुख्यातिथिः भोजमुक्तविश्वविद्यालयस्य कुलपतिः, प्रो. रवीन्द्र कन्हेरे, अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः च समलङ्कृतौ। कुलपतिः प्रो. रवीन्द्र कन्हेरे संस्थानपरिसरेण 'हिन्दीभूषणम्' इति सम्मानेन अलङ्कृतम्। कन्हेरेमहोदयेन हिन्दीभाषायाः आधुनिकोपयोगिता, महत्ता च प्रकाशिते। परिसरप्राचार्येण हिन्दीभाषायाः अधिकाधिकोपयोगाय अभिप्रेरितम्। डॉ. अवनीशर्ममहोदयया स्वागतभाषणम्, डॉ. अर्चनादुबेमहोदयया धन्यवादज्ञापनञ्च प्रस्तुते। कार्यक्रमस्य कुशलसञ्चालनं श्रीसुमितसक्सेना कृतवान्।

## डॉ. पवनकुमारस्य अभिनन्दनसमारोहः

सितम्बरमासस्य १४ दिनाङ्के शिक्षाव्याकरणयोः युवविदूषां डॉ. पवनकुमारवर्याणाम् अभिनन्दनकार्यक्रमः समायोजितः। प्रमोदस्यावसरोऽयं संस्थानस्य एकलव्यपरिसरात् डॉ. पवनकुमारः भोपालपरिसरे समागतः। प्रसङ्गेऽस्मिन् विभागेन एकः स्वागताभि-नन्दनकार्यक्रमः आयोजितः। अस्मिन् शिक्षाशास्त्रीयविद्यार्थिनां प्राध्यापकानाञ्च सहभागिता आसीत्। प्राचार्येण, समुपस्थितप्राध्यापकैः, विद्यार्थिभिश्च पवनकुमारमहोदयानां स्वागतं व्याहृतम्।

# श्रीसदाशिवपरिसरवार्ता

## संस्कृतसप्ताहकार्यक्रमः

श्रीसदाशिवपरिसरेण प्रतिवर्षमिवास्मिन्वर्षे ०८.०७.२०१७ दिनाङ्के संस्कृतदिवसोत्सवं परिपाल्य आसप्ताहं यावत् संस्कृतसप्ताहमहोत्सवः समाचरितः। अस्मिन्नवसरे विभिन्नाः कार्यक्रमाः अभवन्। अस्य कार्यक्रमस्य संयोजकः श्रीविश्वनाथमिश्रमहाभागः आसीत्।

संस्कृतसप्ताहोत्सवस्योद्घाटनसमारोहः परिसरप्राचार्याणां प्रो.अतुलकुमारनन्दमहोदयानामाध्यक्षे अगस्तमासस्य सप्तमदिनाङ्के महताडम्बरेणाभूत्। कार्यक्रमस्यास्य समुद्घाटनकत्वेन पुरीगोवर्द्धनपीठाधीश्वरः परमपूज्यपादजगद्गुरुशङ्कराचार्यः स्वामिश्रीनिश्चलानन्द-सरस्वतीमहाराजो भारतीयसंस्कृतेः वैशिष्ट्यं प्रत्यपादयत्। तदनु महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य उज्जयिनीस्थस्य कुलपतिना प्रो. रमेशचन्द्रपण्डामहाभागेन मुख्यातिथिभाषणेन आङ्गलभाषापेक्षया संस्कृतभाषायाः वैज्ञानिकतां प्रतिपादितम्। मुख्यवक्तृत्वेन तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचराः प्रो.हरेकृष्णशतपथिमहोदयाः संस्कृतवाङ्मयस्य वैशिष्ट्यमुपवर्णयन्तः तत्र रसास्वादनशैलीं च छात्रान् उदबोधयन्। अत्र सम्मानितातिथिपदे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो.गङ्गाधरपण्डामहोदयाः वाराणासीतः सामागत्य गभीरं

शोधपूर्णभाषणं प्रायच्छन्।

संस्कृतसप्ताहकार्यक्रमस्य समापनोत्सवे प्रातः संस्कृतशोभायात्रायाः आयोजनमभूत्। तदनु प्राचार्याणामाध्यक्षे सभा आयोजिता। तत्र मुख्यवक्तृपदे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य भूतपूर्वकुलपतिः प्रो. नीलकण्ठपतिमहोदयः आसीत्। महत्सौभाग्यस्य विषयोऽयं यत् सम्मानितातिथित्वेन परिसरस्य भूतपूर्वप्राचार्याः डॉ. हरिहरझामहोदयाः समागताः, येषां सुदीर्घप्रयासेन परिसरोऽयं पुष्पितः। अस्मिन्नवसरे उत्कलराज्यस्य विशिष्टसंस्कृतविदुषोः पण्डितभागिरथिनन्दशर्मपण्डितब्रह्मानन्दस्वाइँमहोदययोः संस्कृतभाषायाः कृते अमूल्ययोगदानमभिलक्ष्य सम्माननं परिसरप्राचार्येण कृतम्। तथा च विभिन्नप्रतियोगितासु पुरस्कृतानां छात्राणां कृते पुरस्कारान् अयच्छन्।

## स्वतन्त्रतादिवसः

भारतस्य ७१ तमं स्वतन्त्रतादिवसमभिलक्ष्य परिसरेण १५.०८.२०१७ दिनाङ्के स्वतन्त्रतादिवसः महताडम्बरेण परिपालितः। स्वतन्त्रतादिवसस्य अङ्गभूतः राष्ट्रियध्वजारोहणकार्यक्रमः आयोजितः। परिसरप्राचार्यः ध्वजारोहणं कृत्वा छात्रान् स्वतन्त्रतायाः महत्त्वमवबोधयत्। अस्मिन्नवसरे परिसरस्य क्रीडाध्यापकेन श्रीसदाशिवसंस्कृतविद्यालयस्य अस्य परिसरस्य संस्थापकस्य पण्डितश्रीहरिहरमिश्रमहोदयस्य जीवनोपरि चलच्चित्रं प्रदर्शितम् एवं छात्रैः अनेके कार्यक्रमाः आयोजिताः।

## हिन्दीपखवाडाकार्यक्रमः

भारतसर्वकारस्य निर्देशानुसारं हिन्दीभाषायाः प्रचारप्रसाराय परिसरे ०१.०९.२०१७ दिनाङ्कतः १४.०९.२०१७ पर्यन्तं हिन्दीपाखवाडोत्सवः परिपालितः। समुद्घाटनकार्यक्रमे परिसरप्राचार्यस्य प्रो.अतुलकुमारनन्दमहोदयस्याध्यक्षे तथा धर्मशास्त्रविभागस्य वरिष्ठाचार्याणाम् एकलव्यपरिसरस्य प्राचार्यचराणां प्रो.खगेश्वरमिश्रमहोदयानां मुख्यातिथित्वेन सुसम्पन्नः। समापनसमारोहे मुख्यातिथित्वेन परिसरस्य विशिष्टन्तेवासिनः सम्प्रति वङ्गप्रदेशस्य विश्वभारतीविश्वविद्यालये शान्तिनिकेतने आचार्यपदमलङ्कुर्वाणाः प्रो. नरोत्तमसेनापतिमहोदयाः स्वच्छात्रजीवनस्य स्मृतयः श्रावितवन्तः। मुख्यवक्तृत्वेन विश्वभारतीतः समागतः हिन्दीविभागस्य मुख्यः त्रिपाठिवर्यः हिन्दीभाषासंस्कृत-भाषायाः प्रियतमा पुत्रीति उररीकृतवान्। अस्य कार्यक्रमस्य संयोजिका हिन्दीविभागस्य आचार्या डॉ. केतकीमहापात्रमहोदया असीत्। अत्र परिसरस्य अन्ये अध्यापकाः कर्मचारिणश्च समुपस्थिताः। अस्मिन्नवसरे छात्राणां विभिन्नाः प्रतियोगिताः समायोजिताः। ये च पुरस्कारभाजः छात्राः तेभ्यः पुरस्काराः अयच्छन्।

## शिक्षकदिवसः

प्रतिवर्षमिव भारतस्य भूतपूर्वद्वितीयराष्ट्रपतेः डॉ. सर्वपल्लिराधाकृष्णन्महोदयस्य जन्मदिवसमुपलक्ष्य परिसरच्छात्रैः स्वस्वविभागेषु शिक्षकदिवसकार्यक्रमः सोत्साहेन आयोजितः। अवसरेऽस्मिन् सर्वेऽपि छात्राः प्राध्यापकाश्च डॉ. सर्वपल्लिराधाकृष्णन्महोदयस्य व्यक्तित्वविषये तेषां कर्त्तव्यनिष्ठाविषये आलोचितवन्तः। तेषां गुरूणां सम्माननं कार्त्तज्ञं संस्मरन् सर्वे प्रमोदिताः अभवन्।

## दूरस्थशिक्षायाः सत्रारम्भः

छात्रसमृद्धि-समृद्धे अस्मिन् परिसरे बहवः छात्राः दूरस्थशिक्षामाध्यमेन मुक्तस्वध्यायपीठे साहित्यं व्याकरणं ज्योतिषशास्त्रं च पठन्ति। तेषां सत्रारम्भकार्यक्रमः ०५.०९.२०१७ दिनाङ्के परिसरे समनुष्ठितः। अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः विडियोकान्फरेन्समाध्यमेन छात्रान् उद्बोधितवान्। परिसरप्राचार्यः तथा मुक्तस्वाध्यायपीठस्य पुरीपरिसरस्य निदेशकाः डॉ.दुर्गाचरणषडङ्गिमहोदयाश्च सर्वां व्यवस्थाम् कारितवन्तः। परिसरस्य अन्येऽपि आचार्याः कर्मचारिणश्च समुपस्थिताः आसन्।

## गणेशपूजनोत्सवः

ऐषमः श्रीविघ्नेश्वरस्य गणपतेः पूजनोत्सवः भाद्रपदमासस्य कृष्णचतुर्थ्यां २५.०८.२०१७ दिनाङ्के परिसरे तथा च बालकच्छात्रावासे बालिकाछात्रावासेऽपि छात्रैः छात्राभिश्च महताडम्बरेण सम्पादितम्।

## अन्त्योदयमिशन्कार्यक्रमः

भारतसर्वकारस्य ग्रामीणविकासमन्त्रालयसौजन्येन श्रीसदाशिवपरिसरे २७.०७.२०१७ दिनाङ्के मिशन्अन्त्योदयकार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण सेवानिवृत्तभारतीयप्राशासनिकाधिकारी श्रीविजयकुमारनन्दमहोदयः, सम्मानिताथिरूपेण राष्ट्रियसंस्कृत-संस्थानस्य परीक्षानियन्त्रकः प्रो.सुकान्तकुमारसेनापतिमहोदयः मुख्यवक्तृत्वेन परिसरस्य इतिहासविभागाध्यापकः श्रीदुर्गाप्रसाददासमहापात्रश्च उपस्थिताः आसन्। सर्वेऽपि वक्तारः छात्रान् भारतसर्वकारस्य सर्वविधजनकल्याणयोजनाविषये तथा प्रधानमन्त्रिणः जनधनयोजना ग्राम्यसडकयोजना कन्यासमृद्धियोजना सांसद-आदर्शमिशनयोजना मनरेगायोजना बेटीबचाओ-बेटीपढाओयोजना इत्यादीनां विषये बोधितवन्तः।

### पण्डितदीनदयाल-उपाध्यायवर्याणां स्मृतिसभा

ऐषमः भारतसर्वकारस्य निर्देशानुसारं १५.०९.२०१७ दिनाङ्के परिसरप्राचार्याणां प्रो.अतुलकुमारनन्दमहोदयानामाध्यक्षे ऊनविंशतिशताब्द्याः प्रमुखराजनैतिकपुरुषेष्वन्यतमः विशिष्टसाहित्यिकः लेखकः पण्डितदीनदयाल उपाध्यायवर्यः तेषां जन्मशतवर्षिकमभिलक्ष्य स्मृतिसभा चर्च्चासत्रं च आयोजितम्। अस्मिन्नवसरे परिसरस्य प्राक्तनान्तेवसी भुवनेश्वरनगरस्य सत्यसाईमहिलामहाविद्यालयस्याचार्यः राष्ट्रियस्वयंसेवकसंघस्य सदस्यः प्रो.गोपालप्रसादमहापात्रमहोदयः पण्डितदीनदयालमहाभागस्य जीवनचरितविषये आलोकपातमकरोत्। कार्यक्रमेऽस्मिन् विशिष्ट-साहित्यिकः साम्वादिकः प्रो.स्वराजमिश्रमहोदयो मुख्यवक्तृरूपेण पण्डितदीनदयाल उपाध्यायस्य राजनैतिकं वैशिष्ट्यं प्रतिपादितवान्। तत्र गवेषकेण साम्बादिकेन सहित्यअकादमीपुरस्कारेण पुरस्कृतेन डॉ.असितमहान्तिमहोदयेन पण्डितदीनदयाल उपाध्यायस्य जीवनदर्शनं तथा साम्प्रतिककाले युवसमाजोपरि तस्य प्रभावः प्रतिपादितः। अस्य कार्यक्रमस्य संयोजकः इतिहासविभागाध्यक्षः दुर्गाप्रसाददासमहापात्रमहोदयः तथा परिसरस्य वरिष्ठः आचार्यः डॉ.नृसिंहचरणसाहुमहोदयः कार्यक्रमस्य सञ्चालकश्च आस्ताम्।

## श्रीरणवीरपरिसरवार्ता

### श्रीशङ्करशास्त्रार्थपरिषदः आयोजनम्

श्रीसाधारणवैशाखकृष्णद्वितीयातिथौ गुरुवासरे १३.०४.२०१७ दिनाङ्के श्रीरणवीरपरिसरे श्रीशङ्करशास्त्रार्थपरिषदः षष्ठमन्तिमञ्चाधिवेशनं शिक्षाशास्त्रविषयमवलम्ब्य प्रवृत्तम्। अधिवेशनेऽस्मिन् शिक्षाशास्त्रविभागीयैः प्राध्यापकैः डॉ.मदनकुमारझा-डॉ.मदनसिंह-डॉ.प्रमोदशुक्ल-श्रीविवेककुमारवर्यैः शिक्षाशास्त्रस्य विविधबिन्दूनवलम्ब्य स्वकीयं मतमुपस्थापितम्। कार्यक्रमेऽस्मिन् परिसरीयाः सर्वे आचार्याः शोधच्छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्येण प्रो. बच्चाभारतिमहोदयेन कृतम्। एवञ्च समुपस्थितानां महानुभावानां स्वागतं परिषदः सह-संयोजकेन डॉ. तेजनाथपौडेलवर्येण धन्यवादज्ञापनञ्च डॉ. निगमपाण्डेयमहोदयेन च कृतम्। कार्यक्रमस्य संयोजनं सञ्चालनञ्च ज्योतिषविभागाध्यक्षेण प्रो. प्रभातकुमारमहापात्रवर्येण कृतम्।

### केन्द्रीयविद्यालयसङ्घटनस्य शिक्षकाणां कृते प्रशिक्षणकार्यक्रमः

१४.०५.२०१७ दिनाङ्कात् २६.०५.२०१७ दिनाङ्कपर्यन्तं श्रीरणवीरपरिसरे केन्द्रीयविद्यालयस्य संस्कृतशिक्षकाणां कृते द्वादशदिनात्मकं प्रशिक्षणमायोजितम्। कार्यक्रमस्योद्घाटनं मुख्यातिथित्वेन समागतेभ्यः केन्द्रीयविद्यालयसङ्घटनस्य जम्मूसम्भागस्य सहायकायुक्तेभ्यः श्रीअमरजीतसिंहगिलमहाभागेभ्यः दीपप्रज्वालनेन कृतम्। उद्घाटनकार्यक्रमेऽस्मिन् विशिष्टातिथित्वेन प्रो. लक्ष्मीनिवासपाण्डेयाः उपस्थिताः आसन्। सभायामागतानां समेषामतिथीनां स्वागतमाधुनिकविभागाध्यक्षेण श्रीशरच्चन्द्रशर्ममहोदयेन, धन्यवादज्ञापनं डॉ. चन्द्रमौलिरैणामहोदयेन, सञ्चालनञ्च डॉ. प्रमोदशुक्लवर्येण कृतम्।

अस्य प्रशिक्षणकार्यक्रमस्य समापनसत्रे मुख्यातिथित्वेन श्रीसिरिमलासाम्बन्नावर्याः उपायुक्ताः केन्द्रीयविद्यालयसङ्घटनस्य, विशिष्टातिथिरूपेण श्रीमतीनेहामहोदयाः सारस्वतातिथित्वेन च श्रीश्रीधरपाण्डेयवर्याः समुपस्थिताः आसन्। सम्पूर्तिसत्रस्य सञ्चालनं डॉ. मदनकुमारझावर्येण विहितम्। स्वागतं डॉ. धनेशकुमारपाण्डेयवर्येण, धन्यवादज्ञापनञ्च डॉ. आशीषकुमारत्रिपाठिवर्येण च कृतम्। प्रशिक्षणेऽस्मिन् केन्द्रीयविद्यालयस्य त्रिचत्वारिंशत् शिक्षकाः भागं गृहीतवन्तः। प्रशिक्षणकार्यक्रमोऽयं परिसरप्राचार्यस्याध्यक्ष्ये संयोजकत्वे च सम्पन्नः।

### अन्ताराष्ट्रिय-योगदिवसः

राष्ट्रियसंस्कृतसंस्थानस्य जम्मूस्थिते श्रीरणवीरपरिसरे अन्ताराष्ट्रिययोगदिवससमुपलक्ष्य २१.०६.२०१७ दिनाङ्के योगाभ्यासादिकार्यक्रमस्य सोल्लासमायोजनं कृतम्। वरिष्ठयोगविशेषज्ञो डॉ. श्रेयांश कुमार जैनः कार्यक्रमेऽस्मिन् मुख्यातिथिरभूत्। जम्मूस्थित-भारतीययोगसंस्थानस्य वरिष्ठयोगविशेषज्ञः श्रीलालसिंहो विशिष्टातिथिरूपेण, श्रीमती रेणुथापरमहोदया प्रमुखप्रशिक्षिकारूपेण, श्रीयोगेशचन्द्रथापरश्चयोग-सहायकरूपेण योगाभ्यासक्रियान्वयनम् अकार्षुः। परिसरप्राचार्यः प्रो. बच्चाभारतीमहोदयः कार्यक्रमस्य अध्यक्षतामकार्षीत्। दीपप्रज्वलन-मङ्गलाचरणाद्यनन्तरं कार्यक्रमसंयोजको डॉ. सतीश कुमार कपूरः समेषां स्वागतं व्याहार्षीत्।

परिसरच्छात्रैर्विविधासु योगविषयकप्रतियोगितासु सोत्साहं भागो गृहीतः। येषु खलु शिक्षाशास्त्रिद्वितीयवर्षीयः असीम कुमार पाठकः संस्कृतभाषणे, उत्तमकुमाररायश्च हिन्दीभाषणे प्रथमपुरस्कारं प्राप्तवन्तौ। पातञ्जलयोगस्वरूपमधिकृत्य दर्शनविभागप्राध्यापको डॉ.

आशीषकुमारत्रिपाठी च व्याख्यानं प्रस्तुतवान्। योगस्योपादेयतेति विषयमधिकृत्य शिक्षाशास्त्रविभागप्राध्यापकः डॉ. मदनकुमारझा स्वाभिप्रायं प्रकटितवान्। Importance of Yoga in Today's Stressful Life इति विषयमधिकृत्य आधुनिकविभागाध्यक्षः श्री शरतचन्द्रशर्मा स्वविचारान् उपन्यस्तवान्। विविधशास्त्रानुरूपं योगस्वरूपमिति विषयमादाय च व्याकरणविभागाध्यक्षेण प्रो. हरिनारायण तिवारिमहोदयेन सारगर्भितं विशदं व्याख्यानं प्रदत्तम्। आधुनिकयुगे योगमहिमानमुद्दिश्य साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरेण स्वकीयविचाराः प्रस्तुताः।

तदनन्तरं प्राचार्यवर्येण अतिथिमहानुभावानां स्मृतिचिह्नादिप्रदानपुरस्सरं सम्माननं विहितम्। ततो विशिष्टातिथेः मुख्यातिथेः अध्यक्षवर्यस्य च उद्बोधनमभूत्। ज्योतिषविभागाध्यक्षो डॉ. प्रभातकुमारमहापात्रो धन्यवादं विज्ञापितवान्।


सत्रारम्भपूजायां निरतः परिसरप्राचार्यः

### नूतनशैक्षणिकसत्रस्य समारम्भः

०६.०७.२०१७ दिनाङ्के श्रीरणवीरपरिसरे प्राचार्यस्य प्रो. बच्चाभारतीमहोदयस्योपस्थितौ गौरीगणेशपूजनपूर्वकं नूतनशैक्षणिकसत्रस्य समारम्भः अभवत्।

### स्थानान्तरणं पदभारग्रहणञ्च

१७.०७.२०१७ दिनाङ्के परिसरेऽस्मिन् प्रभारिप्राचार्यत्वेन कार्यभारं निर्वहतः शिक्षाशास्त्रविभागाध्यक्षस्य प्रो.बच्चाभारतीमहोदयस्य स्थानान्तरणम् अगरतलापरिसरे अभवत्। तत्स्थाने च लखनऊपरिसरस्य शिक्षाशास्त्रविभागाध्यक्षेण प्रो. लोकमान्यमिश्रवर्येण प्राचार्यत्वेन पदभारो गृहीतः।

### संस्कृतसप्ताहमहोत्सवस्यायोजनम्

अगस्तमासे ०४.०८.२०१७ दिनाङ्कतः १०.०८.२०१७ दिनाङ्कं यावत् परिसरे संस्कृत-सप्ताहसमारोहः सोत्साहं समायोजितः। समारोहस्यास्योद्घाटनं ०४.०८.२०१७ दिनाङ्के परिसर-प्राचार्यस्य प्रो. लोकमान्यमिश्रवर्यस्याध्यक्ष्ये अभवत्। उद्घाटनकार्यक्रमेऽस्मिन् श्रीमतीनेहाशर्मा परिक्षेत्रविकासाधिकारिणी, मुख्यातिथित्वेन उपस्थिता आसीत्। अपरञ्च राष्ट्रपतिसम्मानिताः प्रो. प्रियतमचन्द्रशास्त्रिवर्याः सारस्वतातिथित्वेनोपस्थिता आसन्। अवसरेऽस्मिन् व्याकरण-विभागाध्यक्षेण प्रो. हरिनारायणतिवारिमहाभागेन 'वर्तमाने वेदस्योपादेयता' इतिविषयमाश्रित्य विशिष्टभाषणमपि प्रदत्तम्।

सप्ताहात्मकेऽस्मिन् संस्कृतमहोत्सवे सुभाषितश्लोककण्ठापाठ-श्लोकोच्चारण-शास्त्र-कण्ठपाठ-निबन्धलेखन-संस्कृतभाषण-आशुभाषण-श्लोकान्त्याक्षरी-संस्कृतवाद-विवादस्पर्धाश्च समायोजिताः। एतासु स्पर्धासु विजेतृभ्यः सम्मानः संस्कृतसप्ताहमहोत्सवस्य समापनकार्यक्रमे विहितः। संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहः १०.०८.२०१७ दिनाङ्के समायोजितः। समापनकार्यक्रमेऽस्मिन् श्रीमान् मुहम्मदलियाजखाँवर्यः (उपप्रभागीयन्यायाधीशः जम्मूः) मुख्यातिथित्वेन, राष्ट्रपतिसम्मानिताः प्रो. विश्वमूर्तिशास्त्रिणः प्राचार्यचराः श्रीरणवीर-परिसरस्य च सारस्वतातिथित्वेन समागताः आसन्। अवसरेऽस्मिन् ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमारमहापात्रवर्येण ज्योतिषशास्त्रमधिकृत्य विशिष्टं व्याख्यानमपि प्रदत्तम्। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्येण प्रो. लोकमान्यमिश्रमहोदयेन, समग्रस्यास्य संस्कृतसप्ताहमहोत्सवस्य संयोजनञ्च साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरमहाभागेन कृतम्।


पुरस्कारं वितरति अतिथिगणः

### स्वतन्त्रतादिवसस्यायोजनम्

१५.०८.२०१७ दिनाङ्के श्रीरणबीरपरिसरे स्वतन्त्रतादिवसस्यायोजनं महोत्साहेन कृतम्। अवसरेऽस्मिन् परिसरप्राचार्येण स्वकीये उद्बोधने राष्ट्रभक्तेः प्रेरणा प्रदत्ता। परिसरस्य सर्वे छात्रा अध्यापकाः कर्मचारिणश्चोपस्थिता आसन्।

### श्रीगणेशोत्सवस्यायोजनम्

श्रीरणवीरपरिसरे २५.०८.२०१७ दिनाङ्के श्रीगणेशचतुर्थीपर्व उपलक्ष्य श्रीगणेशपूजनोत्सवः सम्पन्नः। कार्यक्रमस्याध्यक्ष्यं व्याकरणविभागाध्यक्षेण प्रो. हरिनारायणतिवारिवर्येण कृतम्। अवसरेऽस्मिन् श्री बी.सन्तोषकुमारवर्याः प्राचार्याः केन्द्रीयविद्यालयसंघटनम् बनतालाब, जम्मूः मुख्यातिथित्वेन समागताः आसन्। एवञ्च परिसरीयाः सर्वे अध्यापकाः छात्राः कर्मचारिणश्चापि उपस्थिता आसन्।



शिक्षकदिवसाचरणस्य दृश्यम्

### शिक्षकदिवसस्यायोजनं वीडियोकॉन्फ्रेंस्द्वारा मुक्तस्वाध्यायपीठस्य नूतनसत्रस्यारम्भः

०५.०९.२०१७ दिनाङ्के परिसरप्राचार्यस्याध्यक्ष्ये श्रीरणवीरपरिसरे शिक्षकदिवसमुपलक्ष्य कार्यक्रम आयोजितः। कार्यक्रमेऽस्मिन् परिसरप्राचार्येण प्रो. लोकमान्यमिश्रमहाभागेन पुस्तकादिप्रदानेन परिसरीयाणमध्यापकानां सम्मानः कृतः।

अस्मिन्नेव दिवसे मध्याह्ने वीडियोकॉन्फ्रेंस् द्वारा राष्ट्रियसंस्कृतसंस्थानस्य माननीयकुलपतिमहोदयस्योद्बोधनेन मुक्तस्वाध्यायपीठस्यास्य केन्द्रस्य नूतनसत्रस्योद्घाटनमपि अभवत्।



हिन्दीपखवाडाकार्यक्रमे पुरस्कारं वितरति अतिथिमहोदयः

### हिन्दीपखवाड़ाकार्यक्रमः

श्रीरणवीरपरिसरे ०१.०९.२०१७ दिनाङ्कात् १४.०९.२०१७ दिनाङ्कं यावत् हिन्दीपखवाड़ा-कार्यक्रमः परिसरप्राचार्यस्याध्यक्ष्ये आयोजितः। हिन्दीपाखवाड़ान्तर्गतं छात्राणां कृते अन्त्याक्षरीस्पर्धा, निबन्धलेखनस्पर्धा काव्यपाठस्पर्धा अहिन्दीभाषिणामध्यापकानां कृते कर्मचारिणाञ्च कृते निबन्धलेखनादिस्पर्धाः प्रकल्पिताः। स्पर्धासु विजेतॄणां छात्राणाम् अध्यापकानां कर्मचारिणां च सम्मानः १४.०९.२०१७ दिनाङ्के समापनसमारोहे विहितः। हिन्दीपखवाड़ाकार्यक्रमस्य समापनसमारोहे मुख्यातिथित्वेन सुश्रीअञ्जलिशर्मा केन्द्रनिदेशिका, रेडियो कश्मीर, जम्मूः विशिष्टातिथित्वेन प्रो.परमेश्वरीशर्मा हिन्दीविभागः, जम्मूविश्वविद्यालयः, जम्मूः सम्माननीयातिथित्वेन च डॉ. रेणुनन्दामहोदया हिन्दीविभागाध्यक्षा, स्नातकोत्तर एम्.ए.एम्. महाविद्यालयः, जम्मूः समुपस्थिता आसन्। कार्यक्रमेऽस्मिन् अतिथीनां स्वागतम् आधुनिकविषयविभागाध्यक्ष्येण श्रीशरच्चन्द्रशर्ममहोदयेन धन्यवादज्ञापनं ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमार- महापात्रवर्येण, कार्यक्रमस्य सञ्चालनं च हिन्दीप्राध्यापकेन डॉ. सञ्जयमिश्रमहोदयेन कृतम्।

## लखनऊपरिसरवार्ता




योगदिवसकार्यक्रमे आसीनाः अतिथयः

### योगदिवसस्य आयोजनम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जूनमासस्य २१ दिनाङ्के राष्ट्रियसंस्कृतसंस्थान – आई.सी.पी.आर.-संस्थयोः संयुक्ततत्त्वावधाने योगदिवसः आचरितः। यस्मिन्कार्यक्रमे मुख्यातिथिरूपेण वृन्दावनात् आहूतः आसीत् लूसीगेट्स्महोदयः। एवं विशिष्टातिथिरूपेण समुपस्थितः आई.सी.पी.आर. संस्थायाः मुख्यसचिवः प्रो. रजनीशकुमारशुक्लवर्यः। लूसीगेस्टमहोदया योगदिवसमभिलक्ष्य स्वकीयामभिव्यक्तिं प्रस्तुतवती। प्रो. रजनीशकुमारशुक्लमहोदयाः बहूनां योगासनानां परिचयं प्रदत्तवन्तः। कार्यक्रमे अन्येभ्यः स्थानेभ्यः अन्येऽपि गणमान्याः अवसरेऽस्मिन् समागताः। कार्यक्रमस्य संचालनं साहित्यविभागीयप्राध्यापकेन डॉ. पवनकुमार-दीक्षितमहोदयेन कृतम्। कार्यक्रमः प्रातः ८ वादनतः २.०० वादनं यावत् आसीत्। अत्र विविधानां योगानाम् अभ्यासोऽपि कारितः तथा च शोधच्छात्रैः अभीष्टविषयस्योपरि आधारितशोधपत्राणि अपि वाचितानि। कार्यक्रमस्य समाप्तिः राष्ट्रगानेन अजायत। कार्यक्रमे धन्यवादज्ञापनं कृतं ज्योतिषविभागस्य अध्यक्षैः प्रो. मदनमोहनपाठकमहोदयैः।

## नामाङ्कनप्रक्रिया

राष्ट्रियसंस्कृतसंस्थाननवदेहल्या: निर्देशानुसारं २० जूनत: जुलाईमासं यावत् आनलाइन आवेदनप्रक्रिया प्रचलिता। यस्यां प्रक्रियायां प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षाया: छात्रा आवेदनं प्राप्तवन्त:। राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे प्राक्शास्त्रिप्रथमवर्षस्य एवं शास्त्रिप्रथमवर्षस्य कृते प्रवेशपरीक्षा जूनमासस्य अष्टमे दिनाङ्के तथा जुलाईमासस्य १० दिनाङ्के आयोजिता। यस्यां परीक्षायां समुत्तीर्णच्छात्रा: निर्धारितकक्षासु नामाङ्कनं स्वीकृतवन्त:।



सम्भाषणशिविरे अध्ययनरता: छात्रा:

## एकमासीयसरलसंस्कृतसम्भाषणशिविरम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जुलाईमासस्य १३ दिनाङ्कत: सायं ४ वादनत: ५:३० वादनं यावत् एकस्य एकमासीयसरलसंस्कृतसम्भाषणशिविरस्योद्घाटनं संजातम्। शिविरमिदं १३ दिनाङ्कत: आरभ्य १५ अगस्तपर्यन्तं प्रचलितम्। अस्य शिविरस्योद्घाटनं मातु: सरस्वत्या: प्रार्थनया अभवत्। अस्य शिविरस्य मुख्यशिक्षकत्वेन व्याकरणविभागीय-प्राध्यापक: श्रीप्रमोदकुमारशुक्लवर्य: आसीत्। शिविरेऽस्मिन् प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षाणां छात्रा: भागं गृहीतवन्त:। शिविरेऽस्मिन् सर्वे छात्रा: समीचीनरीत्या सरलसंस्कृतसम्भाषणाभ्यासं कृतवन्त:। समये-समये व्याकरणविभागीया: अन्ये प्राध्यापका: अपि छात्राणामुत्साहवर्धनं कृतवन्त:। व्याकरणविभागध्यक्षाणां प्रो. भारतभूषणत्रिपाठिमहोदयानां निर्देशने शिविरमिदं प्रचलितम्।

## वित्तीयशिक्षणम् एवं जागरूकताकार्यक्रम:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जुलाई-मासस्य २१ दिनाङ्के वित्तीयशिक्षणम् एवं जागरूकता कार्यक्रमस्य विषये एका संगोष्ठी समायोजिता। अस्यां संगोष्ठ्यां मुख्यातिथिरूपेण समागत: श्री देवेन्द्रकुमारमहोदय: विशिष्टातिथिरूपेण विराजमान: आसीत् श्री आलोकमिश्रमहाभाग:। कार्यक्रमस्य अध्यक्षत्वं कृतवान् परिसरस्य तद्दिवसस्य प्राचार्य: प्रो. शिशिरकुमारपाण्डेयमहोदय:। कार्यक्रमस्य सञ्चालनं कृतवन्त: अर्थशास्त्रप्राध्यापका: डॉ. एस.पी. सिंहमहोदया:। कार्यक्रमस्यान्ते शिक्षाशास्त्रविभागीयप्राध्यापका: प्रो. देवीप्रसादद्विवेदिमहोदया: धन्यवादज्ञापनं कृतवन्त:। संगोष्ठ्या: समापनं शान्तिमन्त्रेण अजायत।

## वाग्वर्धिनीसभाया: उद्घाटनकार्यक्रम:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जुलाईमासस्य अष्टाविंशतौ दिनाङ्के सायंकाले चतुर्वादने छात्राणां वाक्कौशलस्य वर्धनाय वाग्वर्धिनी सभाया: उद्घाटनं सञ्जातम्। कार्यक्रमस्योद्घाटनं परिसरप्राचार्येण प्रो. विजयकुमारजैनमहोदयेन कृतम्। कार्यक्रमेऽस्मिन् व्याकरणविभागस्य विभागाध्यक्ष: प्रो. भारतभूषणत्रिपाठिवर्य:, प्राध्यापक: डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदय:, श्री प्रमोदकुमारशुक्लाश्च समुपस्थिता: आसन्। कार्यक्रमे शताधिका छात्रा: समुपस्थिता: आसन्। कार्यक्रमस्य सञ्चालनं डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदय: कृतवान्। परिसरप्राचार्येण प्रो. विजय कुमारजैनवर्येण वैदुष्यपूर्णोत्साहवर्धकं छात्राणां मार्गदर्शनाय अध्यक्षीयभाषणं कृतम्। कार्यक्रमस्य समाप्ति: शान्तिमन्त्रेण सञ्जाता।

## संस्कृतसप्ताहसमारोह:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य चतुर्थे दिनाङ्के संस्कृतसप्ताह- समारोहस्योद्घाटनकार्यक्रम: अभूत्। कार्यक्रमस्य आरम्भ: सरस्वत्या: अर्चनया माल्यार्पणेन च अजायत। कार्यक्रमे मुख्यातिथिरूपेण उत्तरप्रदेशस्य विधि: एवं न्यायमन्त्री माननीयव्रजेशपाठकवर्य:, मुख्यवक्तृरूपेण दरभङ्गाविश्वविद्यालयस्य कुलपतय: प्रो. सर्वनारायणझामहोदया: आसन्। विशिष्टातिथिरूपेण विराजमाना आसीत् आई. सी.पी.आर. केन्द्रस्य निदेशिका श्रीमती पूजाव्यासमहोदया। कार्यक्रमस्य अध्यक्ष: परिसरप्राचार्य: प्रो. विजयकुमारजैनमहोदय:। कार्यक्रमसंचालनस्य दायित्वं पालितवन्त: व्याकरण-विभागीयध्यक्षा: प्रो. भारतभूषणत्रिपाठिमहोदया:। सरस्वत्या: वन्दनां कृतवन्तौ अङ्कितपाण्डेय-भास्करकाण्डपालौ च। स्वागतगीतं गीतवत्य: सन्ध्यात्रिपाठि-भव्या-अमृताश्च। वैदिक-मङ्गलाचरणं कृतवन्त: वेदविभागीयपरिसरीयच्छात्रा:। स्वागतभाषणं प्रो. शिशिरकुमार-पाण्डेयमहोदया: कृतवन्त:। कार्यक्रमस्यान्ते ज्योतिषविभागीयविभागाध्यक्षेण प्रो. मदनमोहन-पाठकवर्येण धन्यवादज्ञापनं कृतम्। कार्यक्रमस्य समाप्ति: शान्तिमन्त्रेण जाता।



संस्कृतसप्ताहे पुस्तकलोकार्पणस्य दृश्यम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य सप्तमे दिनाङ्के संस्कृतदिवसं समुपलक्ष्य लखनऊपरिसरे प्रो. सुरेन्द्रझा, प्रो. उमारमणझा प्रो. सुरेन्द्रपाठकप्रभृतिपूर्वप्राचार्याणां सम्मानकार्यक्रमः अभवत्। कार्यक्रमेऽस्मिन् सरस्वत्याः अर्चना परिसरीयच्छात्रैः, स्वागतगीतं परिसरीयच्छात्राभिः, स्वागतभाषणं प्रो. मदनमोहनपाठकमहोदयैश्च कृतम्। कार्यक्रमे सर्वेऽपि सम्मानिताः अतिथयः स्वस्ववैदुष्यपूर्णवाग्भिः छात्राणां पथप्रदर्शनं कृतवन्तः। अस्य कार्यक्रमस्य सभाध्यक्षाः परिसरप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः आसन्। कार्यक्रमस्य सञ्चालनं प्रो. भारतभूषणत्रिपाठिमहोदयाः धन्यवादज्ञापनं च श्रीप्रमोदकुमारशुक्लमहोदयाः कृतवन्तः। कार्यक्रमस्यान्ते राष्ट्रगानं शान्तिमन्त्रश्च अभवत्।



संस्कृतसप्ताहकार्यक्रमे समासीनाः अतिथयः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य अष्टमे दिनाङ्के भाषण-प्रतियोगिता चतुर्षुस्तरेषु आसीत्। प्राक्शास्त्रिस्तरे 'संस्कृतभाषायाः महत्त्वम्' इति विषये, शास्त्रिस्तरे 'संस्कृतस्य वैज्ञानिकता' तथा च आचार्यस्तरे 'संस्कृते पर्यावरणम्' शिक्षाशास्त्रिस्तरे 'संस्कृते संगणकस्योपयोगिता' इति विषयमधिकृत्य प्रतियोगिताः चतुर्षुस्तरेषु अभवन्। प्रथम-द्वितीय-तृतीय-स्थानं प्राप्ताः छात्राः सम्मनिताः। कार्यक्रमस्य सञ्चालनं व्याकरणविभागीयप्राध्यापकेन श्री प्रमोदकुमारशुक्लेन कृतम्।

अगस्तमासस्य नवमे दिनाङ्के श्लोकन्त्याक्षरी एवं सूत्रान्त्याक्षरी च प्रतियोगिते अभूताम्। अस्यां प्रतियोगितायां छात्राः सोत्साहं भागं गृहीतवन्तः। श्लोकान्त्याक्षरीप्रतियोगितायां त्रयः छात्राः चिताः। तथैव सूत्रान्त्याक्षर्यामपि त्रयः बालकाश्चिताः। निर्णायकरूपेण विराजमानाः आसन् प्रो. रामलखनपाण्डेयमहोदयाः प्रो. भारतभूषणत्रिपाठिमहोदयाः डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदयः श्री प्रमोदकुमारशुक्लमहोदयाश्च। ततः परं कण्ठपाठ एवं गीतप्रतियोगिता च आयोजिता। अस्याः प्रतियोगितायाः अध्यक्षतां कृतवन्तः आधुनिकसंकायाध्यक्षाः प्रो. शिशिरकुमारपाण्डेयमहोदयाः। कार्यक्रमस्य संचालनं प्रो. भारतभूषणत्रिपाठिमहोदयाः, स्वागतभाषणं प्रो. देवीप्रसादद्विवेदी एवं मुख्यवक्तृत्वं श्रीमुकेशशर्मामहोदयाश्चकृतवन्तः। प्रतियोगितायां विजेतारः छात्राः समापने पुरस्कृताः। कार्यक्रमस्यान्ते धन्यवादज्ञापनं साहित्यविभागीयप्राध्यापकः डॉ. पवनकुमारदीक्षितमहोदयः कृतवान्।

अगस्तमासस्य दशमे दिनाङ्के संस्कृतसप्ताहस्य समापनकार्यक्रमः सञ्जातः। कार्यक्रमस्यारम्भः सरस्वत्याः अर्चनया माल्यार्पणेन च अभवत्। मुख्यतिथिरूपेण प्रो. रामसुमेरयादवमहोदयाः तथा च सारस्वतातिथिरूपेण समुपस्थितौ प्रो. आजादमिश्र-प्रो. रामसागरमिश्रवर्यौ च। कार्यक्रमस्याध्यक्षपदं समलङ्कृतवन्तः परिसरप्राचार्याः प्रो. विजयकुमारजैनमहाभागाः। छात्राणामुत्साहवर्धनाय सर्वेऽपि मञ्चस्थमुख्यातिथयः सारस्वतातिथयश्च स्वस्य आशीर्वादस्वरूपमुद्बोधनं कृतवन्तः। कार्यक्रमे संचालनस्य कार्यं प्रो. भारतभूषणत्रिपाठिमहोदयाः पुरस्कारवितरणघोषणां श्रीप्रमोदकुमारशुक्लमहोदयाः धन्यवादज्ञापनं डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदयाश्च कृतवन्तः। कार्यक्रमस्यान्ते राष्ट्रगानं गीतम् सर्वैः।

## स्वतन्त्रतादिवसः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य १५ दिनाङ्के स्वतन्त्रतादिवसः आचरितः। अवसरेऽस्मिन् प्रातः कार्यवाहकप्राचार्याः प्रो. शिशिरकुमारपाण्डेयमहाभागाः ध्वजोत्तोलनं कृतवन्तः। ध्वजोत्तोलनसमये सर्वेऽपि परिसरीयप्राध्यापकाः कर्मचारिणः छात्राश्च उपस्थिताः आसन्। ध्वजोत्तोलनानन्तरं सर्वैः राष्ट्रगानं गीतम्। तत्पश्चात् १० वादनतः हस्तकन्दुकक्रीडा आरब्धा तस्योद्घाटनं कार्यवाहकप्राचार्येण कृतम्। क्रीडानन्तरं परिसरे चीनपाकिस्तानाभ्यां भारतस्य विजयार्थं परिसरीयच्छात्रैः प्राध्यापकैः अन्याभ्यागतातिथीभिश्च आदित्यहृदयस्तोत्रपाठः हनुमानचालीसाया पाठश्च कृतः। अवसरे अस्मिन् श्रीमान् महेन्द्रपाण्डेयमहोदयाः उपस्थिताः आसन्। कार्यक्रमे विषयस्य समर्थने परिसरे हस्ताक्षराभियानमपि प्रचालितम्। तत्र सर्वैः छात्रैः छात्राभिः प्राध्यापकैश्च तस्य समर्थने हस्ताक्षरं कृतम्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण अजायत।


पण्डितदीनदयाल उपाध्यायस्य जन्मशतिसमारोहे मञ्चासीनाः मन्त्रिणः डॉ. महेन्द्रनाथपाण्डेयाः

## पण्डितदीनदयाल-उपाध्यायजन्मशतीसमारोहः

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य सप्तदशदिनाङ्के पण्डितदीन-दयालउपाध्यायजन्मशतीसमारोहः आचरितः। कार्यक्रमः सरस्वत्याः अर्चनया माल्यार्पणेन च आरम्भः अभवत्। मुख्यवक्तृरूपेण समुपस्थिताः डॉ. सरजीतसिंहडंगमहोदयाः पण्डित-दीनदयालउपाध्यायस्य कृतित्वे प्रकाशं स्थापितवन्तः। तैः तस्य बहूनि संस्मरणानि श्रावितम्।

मुख्यातिथिरूपेण समागता: मानवसंसाधनविकासमन्त्रालयस्य राज्यमन्त्री डॉ. महेन्द्रनाथपाण्डेयमहाभागा:। तै: स्वकीयोद्बोधने पण्डितदीनदयालोपाध्यायस्य विषये संक्षेपेण उक्त्वा पुन: शिक्षाया: समाजाय कियती आवश्यकता वर्त्तते विषयेऽस्मिन् स्वकीयवैदुष्यपूर्णव्याख्यानं विहितम्। कार्यक्रमे स्वागतगीतं परिसरीयच्छात्रा: वैदिकमङ्गलाचरणं डॉ. नीरजतिवारी एवं मञ्चसञ्चालनं व्याकरणविभागाध्यक्षा: प्रो. भारतभूषणत्रिपाठिमहोदया: कृतवन्त:। परिसरप्राचार्येण प्रो. विजयकुमारजैनमहाभागेन अध्यक्षीयोद्बोधनं कृतम्। तदनन्तरं सर्वे मिलित्वा राष्ट्रगानेन कार्यक्रमं समापितवन्त:।

## अगस्तमासीया वागवर्धिनी सभा स्वच्छता-पखवाडा च

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अगस्तमासस्य वाग्वर्धिनी-सभा २५.०८.२०१७ दिनाङ्के सम्पन्ना। सा सभा डॉ. यदुवीरस्वरूपब्रह्मचारी-डॉ. ज्योतिप्रसाददास-श्रीप्रमोदकुमारशुक्लमहोदयानाञ्च निर्देशने सम्पन्ना। अस्यां सभायां सर्वेभ्य: विभागेभ्य: छात्रा: सोत्साहं भागं स्वीकृतवन्त:। वाग्वर्धिनीसभाया: आरम्भ: सरस्वत्या: अर्चनया वन्दनया च जात:। अस्यां सभायां त्रिंशत् छात्रा: पूर्वनिर्धारितविषयेषु स्वस्य वाक्कौशलं प्रदर्शिवन्त:। कार्यक्रमस्य सञ्चालनं व्याकरणविभागीयप्राध्यापक: श्री प्रमोदकुमारशुक्लमहोदय: कृतवान्। निर्णायकरूपेण विराजमानौ आस्ताम् डॉ. यदुवीरस्वरूपब्रह्मचारि-डॉ. ज्योतिप्रसाददासमहोदयौ च।

'राष्ट्रियसंस्कृतसंस्थानस्य' निर्देशानुसारं राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे १ सितम्बर २०१७ त: १५ सितम्बर २०१७ यावत् 'स्वच्छता-पखवाड़ा' इति नाम्ना एकमभियानं प्रचालितम्। यस्योद्घाटनं १ सितम्बर-सायंकाले सञ्जातम्। अवसरेऽस्मिन् परिसरप्राचार्यविजयकुमारजैनमहोदय: एवं परिसरीयप्राध्यापका: च आसन्। कार्यक्रमोऽयं १ सितम्बरत: १५ सितम्बरं यावत् प्रतिदिनं सायं ४ वादनत: ५ वादनं यावत् अभवत्। अस्योद्देश्यं वर्तते यत् सम्पूर्णेऽपि परिसरे स्वच्छता भवेत्। अनेनकार्येण छात्रेषु सेवाभावस्य तथा च स्वच्छताया: विषये ज्ञानमपि प्रदीयते। येन छात्राणां व्यवहारे स्वस्य परिवेशस्य वातावरणस्य राष्ट्रस्य च विषये कर्तव्यनिष्ठाया: भाव: वर्धेत।

## सम्मानसमारोह:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे व्याकरणविभागे प्राध्यापकपदे कार्यरता: श्रीप्रमोदकुमारशुक्लमहोदया: सितम्बरमासस्य अष्टमे दिनाङ्के सायं षड्वादने रोयट्रीक्लब इति संस्थया 'नेशनल-विल्डर-अवार्ड' इत्यनेन सम्मानिता: अभवन्। पुरस्कारोऽयं शिक्षणक्षेत्रे प्रभावपूर्णशिक्षणकार्याय प्रदीयते। अस्य मूल्याङ्कनं गुप्तरूपेण छात्रै: कार्यते। छात्राणां मूल्याङ्कनाधारेण प्राध्यापकानां चयनं क्रियते। रोयट्रीक्लब इति संस्थाया: सदस्या: प्रतिविद्यालयं गत्वा छात्रै: शिक्षकाणाम् अध्यापनकौशलस्य मूल्याङ्कनं कारयन्ति। शिक्षणकौशलेषु तै: चतुर्विधं मूल्याङ्कनं क्रियते। १. सम्प्रेषणक्षमता, २. प्रेरणाप्रदानम्, ३. व्यक्तित्वविकासाय निर्देश:, ४. छात्राणां मार्गदर्शनं च। मूल्याङ्कनानन्तरं चयनिताध्यापकाय राष्ट्रनिर्माणपुरस्कारं प्रयच्छन्ति।

## हिन्दीपखवाड़ाकार्यक्रम:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे सितम्बरमासस्य १४ दिनाङ्कत: २० दिनाङ्कं यावत् 'हिन्दीपखवाड़ा' इति कार्यक्रम: आयोजित:। अवसरेऽस्मिन् मुख्यातिथिरूपेण श्रीमन्त: नवीनजोशिमहोदया:, मुख्यवक्तृरूपेण श्री आलोकपराडकरमहोदय: च समुपस्थित: आसीत्। कार्यक्रमे अध्यक्षपदं समलङ्कृतवन्त: परिसरप्राचार्या: प्रो. विजयकुमारजैनमहोदया:। अस्य कार्यक्रमस्यारम्भ: वैदिकमङ्गलाचरणेन सरस्वत्या: अर्चनया माल्यार्पणेन स्वागतगीतेन च अजायत। कार्यक्रमस्य संयोजकत्वेन नियोजिता: आसन् आधुनिकविभागस्य संकायाध्यक्षा: प्रो. शिशिकुमारपाण्डेयमहाभागा:। कार्यक्रमे मञ्चसञ्चालने नियुक्ता आसन् अर्थशास्त्राध्यापका: डॉ. एस.पी.सिंहमहोदया:। कार्यक्रमस्यान्ते धन्यवादज्ञापनं कृतवन्त: राजनीतिप्राध्यापका: डॉ. जगन्नाथझामहोदया:। 'हिन्दीपखवाड़ा' इत्येनमभिलक्ष्य विविधा: प्रतियोगिता: आयोजिता: "आधुनिकता में हिन्दी बनाम अंग्रेजी" इति विषये निबन्धलेखनप्रतियोगिता, "हिन्दी में अभिरुचि बढ़ाने के उपाय" इति विषये भाषणप्रतियोगिता च कृता।



अतिथिवर्यं सम्मानयति परिसरप्राचार्य:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे सितम्बरमासस्य १५ दिनाङ्के सायं काले ३ वादनत: स्वच्छतापखवाड़ाया: समापनकार्यक्रम: आसीत्। कार्यक्रमस्यारम्भ: मातु: सरस्वत्या: अर्चनया: माल्यार्पणेन च अभवत्। साहित्यविभागीयप्राध्यापकेन डॉ. नीरजतिवारिमहोदयेन वैदिकमङ्गलाचरणं कृतम्। स्वागतगीतं परिसरीयच्छात्रे भव्या-अमृते च कृतवत्यौ। कार्यक्रमे मुख्यातिथिरूपेण समुपस्थिता: श्रीसुधीरमिश्रमहोदया:, विशिष्टातिथिरूपेण डॉ. रीतामित्तलमहाभागा:। कार्यक्रमस्य संचालक: आसीत् अर्थशास्त्रप्राध्यापक: डॉ. एस.पी. सिंहमहोदय:। कार्यक्रमे स्वच्छतापक्षेषु उत्तमकार्याय चिता: छात्रा: कर्मचारिणश्च प्रमाणपत्रै: पुरस्कृता:। अन्ते आंग्लप्राध्यापिकया डॉ. कविताबिसारियामहोदयया धन्यवादज्ञापनं कृतम्। राष्ट्रगानेन कार्यक्रमस्य समाप्तिरभूत्।

## गङ्गानाथझापरिसरवार्ता

### त्रयोविंशतिदिवसीयः आवासीयः राष्ट्रियसंस्कृतशिक्षकप्रशिक्षणवर्गः



प्रशिक्षणवर्गस्य कार्यक्रमे मञ्चासीनाः प्राचार्यः अतिथयश्च

अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां सञ्चालनेन आभारतं संस्कृतभाषाप्रचाराय राष्ट्रिय-संस्कृतसंस्थानेन राष्ट्रियः संस्कृतशिक्षकप्रशिक्षणवर्गः गङ्गानाथ झा परिसरे समायोजितः। वर्गोऽसौ २२.०६.२०१७ तः १४.०७.२०१७ दिनाङ्कं यावत् सञ्चालितः। तत्र भारतस्य विविधेषु प्रान्तेषु ९० प्रशिक्षार्थिनः समागताः आसन्। प्रशिक्षार्थिनां सार्वाङ्गीणविकासाय नैके विद्वांसः समाहूताः। तैरपि विद्वद्भिः प्रशिक्षार्थिनः प्रबोधिताः उत्प्रेरिताश्च। उद्घाटनसत्रे मुख्यातिथित्वेन प्रो. कृष्णविहारी-पाण्डेयः, अध्यक्षत्वेन परिसरप्राचार्याः डॉ. एन.आर. कण्णन्-महाभागाः विशिष्टातिथित्वेन प्रो. वाई.एस.रमेशः, सारस्वतातिथित्वेन प्रो. ललितकुमारत्रिपाठिवर्या अन्ये च डॉ. रत्नमोहन झा-महोदयाः तथा सुधीष्टमिश्रमहोदयाश्च समागताः आसन्। छात्राणां भोजनवासयोः व्यवस्था परिकल्पिता आसीत्। वर्गस्य समापनसमारोहः १४.०७.२०१७ दिनाङ्के अनुष्ठितः।


माल्यार्पणं विदधानः अतिथिमहोदयः

### अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्योद्घाटनम्

राष्ट्रियसंस्कृतसंस्थानस्य, गङ्गानाथझापरिसरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्योद्घाटनं ०५.०९.२०१७ दिनाङ्के अभवत्। तत्र कार्यक्रमे मुख्यातिथित्वेन न्यायमूर्तिः शबीहुल हसनैन (उच्चन्यायालयः, इलाहाबादः), न्यायमूर्तिः ऋतुराज अवस्थी (उच्चन्यायालयः, इलाहाबादः) तथा अध्यक्षत्वेन परिसरप्राचार्याः डॉ. एन्. आर. कण्णन्-महोदयाः च समागताः आसन्। केन्द्रसंयोजकैः प्रो. ललितकुमारत्रिपाठिवर्यैः छात्राः प्रेरिताः उद्बोधिताश्च। कार्यक्रमे १६० छात्राः समुपस्थिताः आसन्। कार्यक्रमोऽसौ केन्द्रशिक्षकेण अजितकुमारसाहुमहाशयेन सञ्चालितः। तत्र परिसरस्य सर्वेऽपि कर्मचारिणः समुपस्थिताः आसन्।

### स्वच्छतापखवाडासमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य प्रयागस्थे गङ्गानाथझापरिसरे स्वच्छतापखवाड़ासमारोहः परिपालितः। अयं समारोहः ०१.०९.२०१७ तः १५.०९.२०१७ दिनाङ्कं यावत् समायोजितः। कार्यक्रमस्यास्य संयोजकेन डॉ. सुरेशपाण्डेयमहाशयेन परिसरप्राचार्यैः डॉ. एन्.आर. कण्णन्-महोदयैश्च कार्यक्रमोऽसौ ०१.०९.२०१७ दिनाङ्के समुद्घाटितः। तत्र पञ्चदशसु दिनेषु नैके कार्यक्रमाः सम्पादिताः। स्वच्छताविषयिण्यः प्रतियोगिताः सञ्चालिताः। १५.०९.२०१७ दिनाङ्के समापनसमारोहे प्रतियोगितासु प्राप्तपुरस्कारेभ्यः दशभ्यः प्रतिस्पर्द्धिभ्यः प्रचार्यवर्याः पुरस्कारान् अददुः। समारोहे परिसरस्य सर्वेषां व्याख्यातॄणां कर्मचारिणां शोधच्छात्राणाञ्च भागग्रहणमासीत्।

### संस्कृतसप्ताहसमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरे ०७.०८.२०१७ तः १०.०८.२०१७ दिनाङ्कं यावत् संस्कृतसप्ताहसमारोहः परिपालितः। तत्र विविधानां प्रतियोगितानाम् आयोजनं कृतमासीत्। यथा पाणिनीयशिक्षायाः कण्ठस्थीकरणम्, अमरकोषकण्ठपाठः, संस्कृतश्लोकपाठस्पर्द्धा च। प्रयागे विद्यमानेषु महाविद्यालयेषु विश्वविद्यालयेषु च अधीयानाः छात्राः प्रतियोगितासु भागमगृह्णन्। कार्यक्रमस्य सम्पूर्तिसमारोहे मुख्यातिथित्वेन उत्तरप्रदेश-लोकसेवा-आयोगस्य अध्यक्षचराः प्रो. कृष्णविहारीपाण्डेयवर्याः, साहित्यविभागस्य अध्यक्षाः प्रो. शैलकुमारीमिश्राः तथा परिसरस्य व्याख्यातारः कर्मचारिणः छात्राश्च समुपस्थिताः आसन्। प्रतियोगितासु प्राप्तपुरस्कारेभ्यः पुरस्काराः प्रदत्ताः।

### हिन्दीपखवाड़ासमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य प्रयागस्थे गङ्गानाथझापरिसरे १४.०९.२०१७ तः २०.०९.२०१७ पर्यन्तं हिन्दीपखवाड़ा-समारोहः समायोजितः। दीपप्रज्वालनपुरस्सरं कार्यक्रमस्यास्य शुभारम्भः परिसरप्राचार्येण डॉ. एन.आर.कण्णन्-महोदयेन कृतः। अवसरेस्मिन् शोधच्छात्राणां कर्मचारिणाञ्च कृते विभिन्नाः प्रतियोगिताः आयोजिताः पुरस्काराः अपि प्रदत्ताः। अस्य कार्यक्रमस्य संयोजकाः प्रो. रामकृष्णपाण्डेय 'परमहंस'-महोदयाः परिसरस्य सर्वेऽपि आचार्याः, सहाचार्याः, सहायकाचार्याः, अधिकारिणः, कर्मचारिणः प्रयागनगरस्य संस्कृतानुरागिणः च समुपस्थिताः आसन्।



हिन्दीपखवाडाकार्यक्रमस्य एकं दृश्यम्

# वेदव्यासपरिसरवार्ता

## विश्वयोगदिवसः

विगतवर्षमिव केन्द्रसर्वकारस्य सूचनानुसारं परिसरे तृतीयः विश्वयोगदिवसः २१.०६.२०१७ दिनाङ्के समनुष्ठितः। कार्यक्रमोऽयं परिसरीयप्रभारिप्राचार्याणां डा.आशोकचन्द्रगौडशास्त्रिवर्याणाम् आध्यक्ष्ये सुसम्पन्नः। स्थानीययोगप्रचारकः पटियालवर्यः परिसरीयप्राध्यापकान् छात्रान् च योगासनानि सप्रयोगं शिक्षितवान्। तत्र परिसरीयप्राध्यापकाः छात्राश्च सोत्साहं भागमगृह्णन्।

## राज्यस्तरीयच्छात्रसम्मेलने भागग्रहणम्

संस्कृतसप्ताहमुपलक्ष्य हिमाचलसंस्कृत अकादमी द्वारा शिमलायां १७.०७.२०१७ दिनाङ्के समायोजिते राज्यस्तरीयसंस्कृतच्छात्रसम्मेलने परिसरीयप्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयाः सारस्वतातिथिरूपेण समुपस्थिताः। कार्यक्रमोऽयं हिमाचलस्य महामहिमराज्यपालानां प्रो.देवव्रत आचार्याणां हस्ताभ्यां समुद्घाटितः। संस्कृतस्य प्रचारे आधुनिकतन्त्राणां प्रासङ्गिकता नूतनसम्भावनाश्च, संस्कृतस्य वैश्विकी स्थितिः दिशा दशा च इति शीर्षकद्वयोपेते सम्मेलने १२ परिसरीयशोधच्छात्राः भागमगृह्णन्। तत्र परिसरीयप्राध्यापकाः डा.पी.वी.बी. सुब्रह्मण्यम्, डा. गणेशशंकर-विद्यार्थी, डा. सीतारामशर्मा च छात्राणां मार्गदर्शनमकुर्वन्।

## साहित्यपरियोजनायाः परिसंवादः



परिसंवादकार्यक्रमस्य एकं दृश्यम्

साहित्यविभागीयपरियोजनान्तर्गतत्वेन आगस्तमासस्य २८,२९ दिनाङ्कयोः कश्चन परिसंवादः समायोजितः। तत्र मुख्यातिथिः प्रो. अभिराजराजेन्द्रमिश्रवर्यः पूर्वकुलपतिः सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, सारस्वातिथिः प्रो. भक्तवत्सलशर्मवर्यः च आस्ताम्। कार्यक्रमोऽयं परिसरप्राचार्यणाम् आध्यक्ष्ये सम्पन्नः। कार्यक्रमस्य समन्वयं साहित्यपरियोजनायाः मुख्यगवेषकः डा. सुज्ञानकुमारमहान्तिमहोदयः अकरोत्। तत्र हिमाचलप्रदेशस्य तथा राष्ट्रस्तरीयाः विद्वांसः समुपस्थाय हिमाचलस्य संस्कृतसाहित्यं, हिमाचलाभिलेखेषु संस्कृतं, हिमाचलीयहिन्दीसहित्ये संस्कृतप्रभावः, हिमाचलीयपहाडी अपि च लोकसाहित्ये संस्कृतप्रभावः इत्यादिविषयेषु स्वकीयानि गवेषणपूर्णशोधपत्राणि प्रास्तुवन्।

## परिचयात्मिका प्रेरणात्मिका च गोष्ठी

परिसरे छात्रव्यक्तित्वविकासदृष्ट्या तथा सर्वाङ्गीणविकासदृष्ट्या च व्यवस्थापितानां वाग्वर्धिनीशास्त्रसञ्जीवनी-पर्यावरण-सङ्गणक-क्रीडा-संस्कृतप्रचारमञ्चादीनां विभिन्नपरिषदां परिसरीयगतिविधीनाञ्च विषये छात्रोद्बोधनार्थं परिचयार्थं च ०२.०८.२०१७ दिनाङ्के परिचायत्मिका प्रेरणात्मिका च गोष्ठी परिसरप्राचार्याणामाध्यक्षे समायोजिता। तत्र परिसरे नूतनतया प्रविष्टानां छात्राणां कृते परिसरस्य वार्षिकगतिविधीनां विषये व्यक्तित्वविकासकार्यक्रमाणां विषये च परिचयः तत्तत्परिषत्प्रमुखाः उद्बोध्य छात्रान् अभिप्रेरितवन्तः। कार्यक्रमेऽस्मिन् सर्वेऽपि विभागाध्यक्षाः परिसरीयप्राध्यापकाः, छात्राश्च भागमगृह्णन्।

## संस्कृतसप्ताहः



संस्कृतसप्ताहकार्यक्रमस्य एकं दृश्यम्

केन्द्रसर्वकारस्य सूचनानुसारं प्रतिवर्षमिव अस्मिन्नपि वर्षे ०४.०८.२०१७ दिनाङ्कात् १०.०८.२०१७ दिनाङ्कं यावत् परिसरेण संस्कृतसप्ताहसमारोहः समनुष्ठितः। सप्ताहस्याङ्गतया परिसरेण विभिन्नाः कार्यक्रमाः समायोजिताः। तत्र ०४.०८.२०१७ दिनाङ्के उद्घाटनसत्रे हिमाचल-संस्कृताकादम्याः सचिवः डा. मस्तरामशर्मवर्यः मुख्यातिथिः आसीत्। सारस्वातथिः परिसरपूर्व-प्राचार्यः प्रो. रामनारायणदासवर्यः च समुपस्थितः। सप्ताहस्याङ्गतया प्रो.रामनारायणदासवर्याणां संस्कृतविद्वत्सम्माननं विहितं परिसरप्राचार्यैः। १०.०८.२०१७ दिनाङ्के समापनसमारोहे नैनादेवी-संस्कृतमहाविद्यालयस्य सहायकाचार्यः डा. बृहस्पतिमिश्रः विशिष्टातिथिः, निवृत्त-आयुर्वेद- विभागस्य सचिवः हिमाचलसर्वकारः डा. बलरामशर्मवर्यः च आस्ताम्। संस्कृतसप्ताहसमारोहः परिसरप्राचार्याणाम् आध्यक्ष्ये, डा. सुज्ञानकुमारमहान्तिवर्याणां संयोजने च सुसम्पन्नः। सप्ताहस्य अङ्गतया ०५.०८.२०१७ दिनाङ्के महिलाच्छात्रावसे, ०६.०८.२०१७ दिनाङ्के पुरुषच्छात्रावासे च संस्कृतसंवर्धनोपायाः इति विषये परिसंवादकार्यक्रमः तदनु सांस्कृतिककार्यक्रमाश्च समायोजिताः। ०७.०८.२०१७ दिनाङ्के परिसरे स्तोत्रपाठकार्यक्रमः समायोजितः। ०८.०८.२०१७ दिनाङ्के डा. पी.टी.जी.वाई. रङ्गाचार्याणां कालिदासकाव्येषु शतावधानकार्यक्रमः समायोजितः तस्य कार्यक्रमस्य समन्वयं दूरदर्शनस्य संस्कृतवार्तावाचकः डा. गवेशद्विवेदीवर्यः अकरोत्। ०९.०८.२०१७ दिनाङ्के प्रागपुरे परिसरपरिवारेण संस्कृतशोभायात्रा तदनु सम्भाषणशिबिराणां समापनकार्यक्रमश्च समाचरितः। सप्ताहस्य अङ्गतया संस्कृतप्रचारमञ्चद्वारा, शिक्षाशास्त्रविभागद्वारा परिसरस्य समीपग्रामेषु 18 सम्भाषण-शिबिराणि सञ्चालितानि । तदनु अपराह्णे विभिन्नप्रतियोगिताः समायोजिताः परिसरीयच्छात्रेभ्यः।

## स्वतन्त्रतादिवसः स्वतन्त्रतापक्षोत्सवश्च

स्वतन्त्रतादिवसमुपलक्ष्य ०१.०८.२०१७ दिनाङ्कात् १५.०८.२०१७दिनाङ्कं यावत् परिसरेण स्वतन्त्रतापक्षोत्सवः स्वच्छतापक्षोत्सवश्च समनुष्ठितः। पक्षोत्सवेऽस्मिन् राष्ट्रियसेवायोजनाद्वारा स्वच्छ्छताभियानं, वृक्षारोपणम् इत्यादयः विभिन्नाः कार्यक्रमाः समाचरिताः। १५.०८.२०१७ दिनाङ्के 'बेटी बचाओ-बेटी पढाओ' अभियानस्य अङ्गतया परिसरीयमहिलाच्छात्रे सुश्रीज्वाला, सुश्रीसविता च ध्वजारोहणकार्यक्रमे महिलाछात्रप्रतिनिधिरूपेण ध्वजारोहणे परिसरप्राचार्यैः सह भागमगृह्णीताम्। तदनु सांस्कृतिककार्यक्रमाः समायोजिताः। अस्य कार्यक्रमस्य संयोजनं राष्ट्रियसेवायोजनायाः संयोजकः डा.पी.वी.बी.सुब्रह्मण्यंवर्यः आसीत्।



अतिथिवर्यं सभाजयति परिसरप्राचार्यः

## व्याकरणशास्त्रीयकार्यशाला

व्याकरणशास्त्रीयपरियोजनायाः अङ्गतया २१.०८.२०१७ दिनाङ्कात् २७.०८.२०१७ दिनाङ्कं यावत् "वर्तमानयुगे संस्कृतशास्त्रेषु शोधसम्भावनाः" इति विषये एका कार्यशाला समायोजिता। कार्यशलायामस्यं भोपालपरिसरस्य पूर्वप्राचार्यः प्रो.अजादमिश्रवर्यः आन्तमुपस्थाय भागग्रहीतॄन् उपादिशत्। कार्यक्रमस्य संयोजनं व्याकरणपरियोजनायाः मुख्यगवेषकः डा. ब्रजभूषणओझावर्यः आसीत्।

## पाण्डुलिपिविज्ञाने लिपिविज्ञाने च राष्ट्रियकार्यशाला

राष्ट्रियपाण्डुलिपिमिशन् तथा राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यसपरिसरः अनयोः संयुक्ताध्वर्यवे २५.०८.२०१७ दिनाङ्कात् १४.०९.२०१७ दिनाङ्कं यावत् परिसरेण पाण्डुलिपिविज्ञाने लिपिविज्ञाने च राष्ट्रियकार्यशाला समायोजिता। कार्यशालायमस्यां राष्ट्रस्य विभिन्नेभ्यः स्थानेभ्यः उपचत्वारिंशत् शोधार्थिनः प्राध्यापकाश्च भागमगृह्णन्। तत्र प्रो.अभिराजराजेन्द्रमिश्रवर्यः पूर्वकुलपतिः सम्पूर्णानन्दविश्वविद्यालयः, डा. कृष्णमुरारिमहोदयः टांकरीलिपिविशेषज्ञः, प्रो.प्रकाशपाण्डेयः प्रचार्यः जयपुरपरिसरः, इत्यादयः विद्वांसः भागग्रहीतॄन् शारदालिपिं, ब्राह्मीलिपिं, टांकरीलिपिं पाठसम्पादनसम्बद्धान् नैकान् विषयान् शिक्षितवन्तः। कार्यशालायाः अस्याः संयोजकः डा. सुज्ञानकुमारमहान्तिवर्यः आसीत्।

## शिक्षकदिवसः

छात्रकल्याणपरिषदा परिसरीयच्छात्रैश्च मिलित्वा परिसरे डा. सर्वपल्लिराधाकृष्णन्वर्यस्य जन्मदिनमुपलक्ष्य शिक्षकदिवसकार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् राधाकृष्णन्वर्यस्य व्यक्तित्वविषये तदीयविचारविषये तथा शिक्षकाणां गुणानां विषये परिसंवादकार्यक्रमः समायोजितः। तत्र परिसरीयच्छात्राणां कृते प्राध्यापकाश्च स्वकीयान् विचारान् प्रास्तुवन्। अस्य संयोजनं डा. पुरुषोत्तमवर्यः, डा.वासुमोहनवर्यश्च अकुरुताम्।

## स्वच्छताभियानम्, वृक्षारोपकार्यक्रमश्च

परिसरस्य राष्ट्रियसेवायोजनाद्वारा समये समये विभिन्नकार्यक्रमाः समायोज्यन्ते। तेषाम् अङ्गतया परिसरसमीपग्रामेषु स्वच्छताभियानकार्यक्रमः तदनु वृक्षारोपणकार्यक्रमश्च समायोजितः। कार्यक्रमेऽस्मिन् परिसरीयसेवायोजनायाः कार्यकर्तारः 50 वृक्षाणामारोपणं तदनु ग्रमीणानां कृते वृक्षसंरक्षणविषये च अभिप्रेरितवन्तः।

## स्थापनादिवसः

१६.०९.२०१७ दिनाङ्के परिसरस्य स्थापनादिवसमुपलक्ष्य परिसरेण परिसरीयसमुदायस्य अन्तःक्रियात्मककार्यक्रमः कश्चन समायोजितः। कार्यक्रमेऽस्मिन् परिसरसर्वप्राध्यापकाः परिसरस्य स्थापनात् अद्य यावत् भागभूताः स्थानिकाः ग्रामीणाः समुपस्थितवन्तः। परिसरस्य स्थापनात् आरभ्य परिसरस्य विभिन्नस्थितिविषयेषु परिसरस्य विकासस्य करणभूतान् सर्वान् संस्मृत्य अग्रिमविकासयोजनाविषये चर्चामकुर्वन्।

## हिन्दीपखवाडा

केन्द्रसर्वकारस्य सूचनानुसारं प्रतिवर्षमिव अस्मिन्नपि वर्षे १४.०९.२०१७ दिनाङ्कात् २८.०९.२०१७ दिनाङ्कं यावत् परिसरेण हिन्दीपखवाडाकार्यक्रमः समनुष्ठितः। १४.०९.२०१७ दिनाङ्के उद्घाटनकार्यक्रमे मुख्यातिथिः श्रीराजेशमहोदयः प्राचार्यः केन्द्रीयविद्यालयः नलेटी उपस्थाय हिन्दीभाषायाः साम्प्रतिकस्थितिविषये उदबोधयत्। कार्यक्रमस्यास्य अध्यक्षाः परिसरप्राचर्याः, संयोजकः डा. गणेशशङ्करविद्यार्थिवर्यश्च आसन्। हिन्दीपखवाडाकार्यक्रमस्याङ्गतय परिसरे विभिन्नाः कर्यक्रमाः समायोजिताः। १४.०९.२०१७ दिनाङ्के इण्टरनेटद्वारा लाभः उत हानिः इति विषये भाषणप्रतियोगिता, १५.०९.२०१७ दिनाङ्के हिन्दीकवितापाठः। १८.०९.२०१७ दिनाङ्के प्रश्नोत्तरकार्यक्रमः, १९.०९.२०१७ निबन्धलेखनप्रतियोगिता, २०.०९.२०१७ दिनाङ्के चित्रलेखनप्रतियोगिता, २२.०९.२०१७ दिनाङ्के गोष्ठी, २५.०९.२०१७ दिनाङ्के विभिन्नावेदनपत्राणां हिन्द्यामनुवादः त्रुटिसंशोधनविषये कार्यशाला इत्यदयः आयोजिताः।

## राजीवगान्धीपरिसरवार्ता

### योगदिवसस्य आचरणम्

जून्मासे २१ दिनाङ्के अन्ताराष्ट्रिययोगदिवसमधिकृत्य योगविषयिणी कार्यशाला सत्रचतुष्टयव्यापिनी पसिरेणानेन समाचरिता। तत्र परिसरप्राचार्यः आचार्यः ए.पि. सच्चिदानन्दवर्याः अध्यक्षपदम् अलमकार्षुः एवम् आचार्याः ए.सुश्रुतवर्याः योगविषये छात्रान् उदबोधयन्। श्रीमन्तौ कृष्णानन्तपद्मनाभगणेशपण्डितवर्यौ कार्यशालायाः संयोजकौ आस्ताम्।

### सेवाकालिकप्रशिक्षणवर्गस्य आयोजनम्

मे मासे १५ दिनाङ्कतः २६ दिनाङ्कपर्यन्तं परिसरेणानेन केन्द्रियविद्यालयीयसंस्कृत-शिक्षकाणां सेवाकालिकप्रशिक्षणवर्गः समाचरितः। तत्र परिसरप्राचार्याः आचार्याः ए.पि. सच्चिदानन्दवर्याः अध्यक्षपदमलमकार्षुः। एवम् आचार्याः महाबलेश्वररावूवर्याः, प्रशिक्षण-वर्गस्य अस्य समुद्घाटकाः आसन्। डॉ.बालाजिवर्याः अस्य संयोजनकार्यं निरवहन्।




प्रशिक्षणवर्गस्य उद्घाटनकार्यक्रमस्य दृश्यम्

३१.०५.२०१७ दिनाङ्कतः ११.०६.२०१७ दिनाङ्कपर्यन्तं परिसरेऽस्मिन् संस्कृतभारत्या राष्ट्रियसंस्कृतसंस्थानेन च आयोजितः महाविद्यालयच्छात्रप्रशिक्षणवर्गः समाचरितः। तत्र परिसरप्राचार्याः आचार्याः ए.पि. सच्चिदानन्दवर्याः अध्यक्षपदान्विताः अभूवन्। एवं कार्यक्रमस्य मुख्याभ्यागताः देवीदासकामत्वर्याः, समुद्घाटकाश्च आसन्। डॉ.सूर्यनारायणभट्टवर्याः कार्यक्रमस्यास्य संयोजनकार्यं निरवहन्।

### संस्कृतसप्ताहस्य वृत्तान्तः

शृङ्गेरीस्थस्य राष्ट्रियसंस्कृतसंस्थानान्तर्गतस्य राजीवगान्धीपरिसरस्य ऐषमः संस्कृत-सप्ताहः "संस्कृतोत्सवः-२०१७" इति नाम्ना हेमलम्बसंवत्सरस्य श्रावणशुक्लद्वादशीमारभ्य श्रावणकृष्णतृतीयापर्यन्तं (०४.०८.२०१७ तः १०.०८.२०१७ पर्यन्तं) विविधाभिः स्पर्धाभिः विविधैः कार्यक्रमैश्च महता सम्भ्रमेण सम्पन्नः। संस्कृतसप्ताहस्य सुचारुसञ्चालनाय प्राचार्याणामादेशानुगुणं संस्कृतसप्ताहसमितिः रचिता। यस्यां समितौ आचार्यः सुब्राय वि. भट्टः, डॉ. रामचन्द्रुल बालाजी, डॉ. मुरलीकृष्ण टि. तथा डॉ. गणपति वि. हेगडे इत्येते अध्यापकाः सञ्चालकत्वेन निर्दिष्टाः।


परिसरीयप्रकाशनं लोकाय अर्पयन्तः अनन्तश्रीविभूषित-भारतीतीर्थमहास्वामिनः

### संस्कृतोत्सवस्य उद्घाटनसमारोहः


आशिषः प्रयच्छन्तः अनन्तश्रीविभूषितविधुशेखरभारतीमहास्वामिनः

संस्कृतसप्ताहस्य उद्घाटनसमारोहः हेमलम्बश्रावणकृष्णद्वितीयायां (०९.०८.२०१७ दिनाङ्के) नृसिंहवनस्थे गुरुनिवासे शृङ्गेरी शारदापीठाधीश्वराणां श्रीश्रीश्रीभारतीतीर्थमहास्वामिनां तथा तत्करकमलसञ्जातानां श्रीश्रीश्रीविधुशेखरभारतीमहास्वामिनां सान्निध्ये प्रातः नववादनात् सार्धैकादशवादनपर्यन्तं सुसम्पन्नः। श्रीश्रीभारतीतीर्थश्रीचरणाः दीपप्रज्वालनपूर्वकं कार्यक्रमममुम् उद्घाटितवन्तः। ततश्च परिसरप्राचार्याः आचार्याः ए.पि. सच्चिदानन्दवर्याः उभयेषां श्रीचरणानां चरणनलिनयोः साष्टाङ्गप्रणिपातपूर्वकं फलानि समर्पितवन्तः। कार्यक्रमस्यादौ वैदिकमङ्गला-चरणम् आदर्शबालचन्द्राभ्यां कृतम्। पौराणिकं मङ्गलाचरणं क्षमाभवान्यौ कृतवत्यौ।

संस्कृतोत्सवमुपलक्ष्य प्रास्ताविकं स्वागतञ्च परिसरस्य प्राचार्याः आचार्याः ए.पि. सच्चिदानन्दवर्याः अकार्षुः। कार्यक्रमेऽस्मिन् उभये जगद्गुरवः नवसङ्ख्याकानि परिसरप्रकाशनानि आविष्कारमकार्षुः। तानि वाक्यार्थपरिषदः वाक्यार्थभारती एवं व्याकरणद्यष्टौ विभागानां विभागीयराष्ट्रियसङ्गोष्ठीषु प्रस्तुतानां शोधपत्राणां सारसङ्ग्रहलेखनयुतानि ग्रन्थरूपाणि। तत्तत्पुस्तकानां सम्पादकाः प्राचार्यश्च उभयेभ्यः जगद्गुरुभ्यः प्रकाशनानि समर्प्य तस्याविष्कृतिकार्यं सम्पादितवन्तः। डॉ. रामचन्द्रुल बालाजीवर्यः कार्तज्ञ्यं समर्पितवन्तः। श्रीश्रीश्रीविधुशेखरभारतीश्रीचरणाः संस्कृतस्य माहात्म्यमवबोध्य संस्कृताध्ययने संस्कृतस्य शास्त्राणाञ्च संरक्षणे प्रचारे च कर्तव्यानंशान् उद्बोध्य परिसरीयान् अध्यापकान् छात्रांश्च अन्वगृह्णन्।

कार्यक्रमस्यान्ते श्रीचरणाः भगवत्याः शारदायाः अमृतशिलामयीं मूर्तिं परिसरप्राचार्यैभ्यः प्रदाय अन्वगृह्णन्। वैदिकराष्ट्रगीतपुरस्सरं कार्यक्रमोऽयं सम्पूर्णतामवाप। सभामिमाम् आचार्याः सुब्राय वि भट्टाः सञ्चालितवन्तः।

## संस्कृतोत्सवाङ्गतया समायोजिताः विविधस्पर्धाः

संस्कृतोत्सवमुपलक्ष्य आसप्ताहं परिसरीयच्छात्रेभ्यः शृङ्गेरीमण्डलान्तर्गतप्रौढशालाच्छात्रेभ्यश्च विविधाः स्पर्धाः परिसरे समायोजिताः आसन्। तस्य विवरणमधः प्रस्तूयते–

०४.०८.२०१७ दिनाङ्के अपराह्णे द्विवादनात् पञ्चवादनपर्यन्तं कनिष्ठस्तरीयेभ्यः छात्रेभ्यः भारतस्य सीमाविवादः इति विषयमधिकृत्य संस्कृतसिद्धभाषणस्पर्धा वरिष्ठस्तरियेभ्यः छात्रेभ्यः संस्कृताशुभाषणस्पर्धा च समायोजिता।

०५.०८.२०१७ तथा ०६.०८.२०१७ दिनाङ्कयोः प्रौढशालास्तरीयस्पर्धा–उद्घाटनसमारोहसमापनसमारोहादीन् कार्यक्रमानुपलक्ष्य पूर्वसिद्धता कृता।

०७.०८.२०१७ दिनाङ्के संस्कृतसमूहगानस्पर्धा समायोजिता।

०८.०८.२०१७ दिनाङ्के प्रौढशालाच्छात्रेभ्यः चतस्र स्पर्धाः समाायेजिताः। ताश्च १. भगवद्गीताकण्ठपाठः (१५ अध्यायस्य १–१० श्लोका) २. संस्कृतगीतगानम् ३. संस्कृतसिद्धभाषणस्पर्धा (विषयः–आतङ्कवादसमस्या तन्निवारणोपायाश्च।) तथा ४. चित्रं दृष्ट्वा संस्कृतकथालेखनम् इति। एतासु स्पर्धासु अधःसूचितप्रौढशालाभ्यः आहत्य चत्वारिंशतिसङ्ख्यकाः छात्राः समागत्य भागमगृह्णन्।

ज्ञानभारतीप्रौढशाला, शृङ्गेरि २. सर्वकारीयपदविपूर्वमहाविद्यालयः, कम्मरडी ३. ए.आर्.एस्. प्रौढशाला, हरिहरपुरम्, कोप्प ४. श्रीजगद्गुरु अभिनवविद्यातीर्थप्रौढशाला, शृङ्गेरी ५. सर्वकारीयप्रौढशाला, निलुवागिलु, कोप्प ६. जेसीस् प्रौढशाला, शृङ्गेरी ७. सर्वकारीयप्रौढशाला, तोरेहड्लु ८. सर्वकारीयपदविपूर्वमहाविद्यालयः, शृङ्गेरी ९. दर्शिनीप्रौढशाला, शृङ्गेरी।

०९.०८.२०१७ दिनाङ्के मध्याह्नोत्तरं रसप्रश्नस्पर्धायां भागग्राहिणां चयनार्थं लेखनपरीक्षा तथा श्लोकान्त्याक्षरीस्पर्धा च समायोजिता।

१०.०८.२०१७ दिनाङ्के प्रातः दशवादनात् एकवादनपर्यन्तं चितान् पञ्चविंशतिसङ्ख्यकान् भागग्राहिणः पञ्चसु समूहेषु कृत्वा रसप्रश्नस्पर्धा आयोजिता। रसप्रश्नकार्यक्रमममुं डा. श्यामसुन्दरभट्टः, डॉ. नारायण वैद्यः, डॉ. प्रसादभट्टश्चेत्येतेषाम् अध्यापकानां साहाय्येन डॉ. मुरिलकृष्णः समचालयत्।

## संस्कृतोत्सवस्य समारोपसमारोहः

संस्कृतसप्ताहस्य समारोपसमारोहः हेमलम्बश्रावणकृष्णतृतीयायां (१०.०८.२०१७ दिनाङ्के) परिसरीये सुदुघासभाभवने सुसम्पन्नः। कार्यक्रमस्यादौ शास्त्रितृतीयवर्षीयच्छात्रौ श्रीगणेशशङ्करौ वैदिकमङ्गलमकुरुताम्। प्राक्शास्त्रिद्वितीयवर्षीयच्छात्रः शशाङ्कभट्टः पौराणिकं मङ्गलमकरोत्। मीमांसाविभागाध्यक्षः आचार्यः सुब्राय वि. भट्टवर्यः स्वागतं प्रास्ताविकम् अभ्यागतपरिचयञ्च अकरोत्। कार्यक्रमेऽस्मिन् संस्कृतसप्ताहोत्सवाङ्गतया समयोजितासु स्पर्धासु विजेतृभ्यः प्रौढशालाच्छात्रेभ्यः परिसरीयच्छात्रेभ्यश्च पारितोषकवितरणं कृतम्।


संस्कृतसप्ताहसमारोपकार्यक्रमे उपस्थिताः अतिथयः

अस्मिन् कार्यक्रमे विशेषातिथित्वेन संस्कृतभारत्याः अखिलभारतीयभाषाप्रचारमन्त्री आचार्यः दिनेशकामतवर्यः एवं विशेषाभ्यागतरूपेण मैसूरुस्थस्य महाराजासंस्कृत–महाविद्यालयस्य निवृत्तप्राध्यापकः आचार्यः श्री ए.एम्. चन्द्रशेखरवर्यश्च समासीनः आसीत्। आचार्यः दिनेशकामतवर्यः स्वभाषणे संस्कृतभाषायाः प्रचारप्रसारयोः विषये तथा आचार्यः ए. एम्. चन्द्रशेखरवर्यः संस्कृतभाषायाः प्रयोगे विद्यमानायाः वैशिष्ट्यस्य विषये च सम्यक् उद्बोधितवन्तः। परिसरप्राचार्यः आचार्यः ए.पि. सच्चिदानन्दवर्यः अभ्यागतान् सम्मानीय अध्यक्षभाषणं व्यधात्। ज्यौतिषविभागाध्यापकः डॉ. मुरलीकृष्णवर्यः कृतज्ञतासमर्पणमकरोत्। ऐक्यमन्त्रेण सह सभाकार्यक्रमोऽयं समाप्तिमगात्। अस्मिन्नेव सन्दर्भे सतर्कतादिवसमुपलक्ष्य परिसरीयप्राचार्यः उपस्थितेभ्यः सर्वेभ्यः प्रतिज्ञाविधिम् उदबोधयत्।

एतस्यानन्तरं सायं ०४:०० वादनतः ०५:०० वादनपर्यन्तं विविधाः सांस्कृतिककार्यक्रमाः सुसम्पन्नाः। कार्यक्रमस्यादौ भवानीगणस्य पुष्पाञ्जलिः इत्याख्य नृत्यकार्यक्रमः आसीत्। समकालमेव नवनीतकृष्णः चित्रलेखनम् अकरोत्। ततः परं यथाक्रमम् अमृताकोण्डिगणस्य नारायणरायकरगणस्य च गायनकार्यक्रमः सभासीनेष जनेषु आनन्दमजनयत्।

# विशिष्टसंस्कृतसेवाव्रतिसम्मानः 2017

## श्री भाग्येश वासुदेव झा (आई.ए.एस्., सेवानिवृत्तः)



श्री भाग्येश वासुदेव झामहोदयः गुजरातविश्वविद्यालयेन संस्कृतविषये स्नातकोपाधिं स्वर्णपदकेन सह समाप्नोत्। एल्.एल्.बि. उपाधिं, माञ्चस्टरविश्वविद्यालयात् Training and Development विषये विशेषोपाधिं च अलभत। तदनु भारतीय-लोकसेवा-आयोगस्य परीक्षाम् उत्तीर्य आ.ए.एस्. उपाधिम् अवाप्य गुजरातराज्यस्य नडियादक्षेत्रे (1998-2001) वडोदराक्षेत्रे च (2001-2005) जिलाधीशकार्यं निरवहत्। द्विः अत्युत्तमः जिलाधीशः इत्यनेन सममानयत्। महोदयोऽसौ गुजरातसाहित्यअकादम्याम् अध्यक्षरूपेण कार्यं व्यदधात्। गुजरातप्रदेशे ब्रह्मर्षिसंस्कृतधाम इति संस्कृतपाठशालायाः स्थापने महोदयस्य योगदानम् अगणनीयम्। गुजरातप्रदेशस्य गरबाइत्याख्यं प्रसिद्धलोकनृत्यं संस्कृते अनूद्य नृत्यम् अकारयत्। आषाढस्य प्रथमदिवसे इति नाम्ना संस्कृतोत्सवस्य आरम्भोऽपि महोदयेन अकृत। Management in Bhagvadgeeta इति विषये विदेशस्य न्यूजर्सि, सान् फ्रान्सिस्को इत्यादिप्रदेशेषु उपन्यासं व्यदधात्। महोदयेन 2007तमे वत्सरे आयोजितः शास्त्रीयसंगीतकार्यक्रमः गिनीस रिकार्डमध्ये नामाङ्कितो वर्तते। भगवद्गीता विषये च कालिदासस्य विषये महोदयस्य उपन्यासः प्रसिद्धः विद्यते। गीर्वाणवाण्याः सेवातत्परोऽयं संस्कृतमातुः सेवायै अन्यानपि प्रेरयति। अतोऽसौ तोष्टुत्यः अभिनन्दनीयश्च।

## डॉ. आर्.वि.एस्.एस्. अवधानुलु



डॉ. आर्.वि.एस्.एस्. अवधानुलुमहोदयः 25 सप्तम्बर 1948तमे वर्षे आन्ध्रपेदेशराज्यस्य पोडगट्लपल्लीग्रामे जन्म प्राप्नोत्। आन्ध्रविश्वविद्यालयात् परमाणुभौतिकशास्त्रस्य (Nuclear Physics) विषये स्नातकोत्तरोपाधिं 1969तमे वर्षे प्रापत्। एवम् आस्ट्रो साईन्सविषये पी.एस्. तेलुगुविश्वविद्यालयात् स्नातकोत्तरोपाधिं, ओसमानियाविश्वविद्यालयात् शोधोपाधिं च अलभत। सर्वकारस्य अनेकासु संस्थासु कार्यं कुर्वाणस्य हैदराबादस्थ-Nizam's Institute of Medical Science इति संस्थायाः उपनिदेशकपदवीतः सेवानिवृत्तस्य महोदयस्य 45 वर्षाणां महान् अनुभवः विद्यते। पारम्परिकरूपेण यजुर्वेदस्य मीमांसावेदान्तादिशास्त्राणामपि अध्ययनमकार्षीत्। संगणकविषये वेदे वेदगणिते च तलस्पर्शिज्ञानं विद्यते महोदयस्य। वेदानां वैश्विकोपयोगाय वेदानां सांकेतीकरणं (Digitization) तथा च 1600 घण्टानां दुर्लभानां मन्त्रोच्चाराणानां ध्वनिमुद्रणं च समगृह्णात्। Computer codes for Indian Languages, Computer Science with Vedic Mimamsa, Braille script for Vedic Mathematics इत्यादीनाम् अनेकेषां विषयाणां प्रकल्पम् आरभत। सर्वदा संस्कृतभाषां समुपासीनः संस्कृतस्य प्रचारार्थं यतते। आधुनिकविद्यां समधिगतस्य पारम्परिकसंस्कृतविद्याम् आरक्षयतः महोदयस्य सरस्वतीसमुपासना प्रशंसनीया नंनम्या च।

## डॉ. मुरली नन्दी



डॉ.म ुरलीनन्दीमहाभागः1 6म ई1 975तमेव र्षेअ न्ध्रप्रदेशराज्यस्यि तरुपतिक्षेत्रेज निमलभत।म होदयस्य अध्ययनं संगणकक्षेत्रे प्रावर्तत। संस्कृतभाषाविषये महोदयस्य महान् आदरः संस्कृतव्याकरणविषये महती अभिरुचिश्च विद्यते। तान्त्रिकक्षेत्रे एम्.सी.ए. उपाधिं प्रथमश्रेण्यां मधुरै-कामराजविश्वविद्यालयात् समर्जयत्। तमिलनाडुस्थ-अलगप्पा-विश्वविद्यालयात् एम्.फिल्-उपाधिं काञ्चीपुरस्थ-श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वविद्यालयात् Understanding of Elementary Sanskrit - Text at word Level, Phrase Level and sentence Level इति विषये शोधोपाधिं च समाप्नोत्। यद्यपि महोदयस्य अध्ययनं संस्कृतक्षेत्रे नाभवत् तथापि संस्कृतक्षेत्रे अमुष्यः योगदानं श्लाघ्यं वर्तते। एन्.एल्.पि. संस्कृतव्याकरणस्य च विषये आपञ्चदशवर्षेभ्यः कार्यं विदधानो विद्यते। संस्कृतज्ञानस्य वैश्विकोपयोगाय Sanksrit Website, Manuscript Monitoring System, Dhaturatnakara Website, Panineeya Vyakarana Udaharan Kosha, Vachaspatyam Website, Manuscript Cataloguing System इत्यादीनाम् अनेकेषां तन्त्रांशानां निर्माणम् अकार्षीत्। संगणकीयसंस्कृतस्य विषये नैकानि शोधपत्राणि प्रास्तौत्। संस्कृतभाषायाः उन्नतिं कामयमानो महोदयः संगणकमाध्यमेन सुरसरस्वतीं समुपास्ते। नूनं प्रयत्नः श्लाघ्यः भृशम् अभिनन्दनीयश्च।

# संस्थानस्य नवप्रकाशनम्




Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.IX Issue No.36-37 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007